कथामन्दाकिनी



उत्तर प्रदेश संस्कृत संस्थान
लखनऊ

कथामन्दाकिनी

ओम् प्रकाशठाकुर :

उत्तर प्रदेश संस्कृत संस्थान
लखनऊ

प्रकाशक :
श्रीमती अलका श्रीवास्तव
निदेशक :
उत्तर प्रदेश संस्कृत संस्थान, लखनऊ

प्राप्ति स्थान :
विक्रय विभाग :
उत्तर प्रदेश संस्कृत संस्थान, नया हैदराबाद,
लखनऊ–२२६ ००७

प्रथम संस्करण :
वि.सं. २०५५ (१९९८ ई)
प्रतियाँ : १०००
मूल्य : रु. ६०/– (साठ रुपये)

छाया चित्र : **कु. मीरा द्विवेदी**

मुद्रक : **शिवम् आर्ट्स**, निशातगंज लखनऊ । दूरभाष : ३८६३८९

पुरोवाक्

कथानां कथने श्रवणे च आबालवृद्धं मानवानां नैसर्गिकी काचित् प्रवृत्तिर्जगति दृक्पथम् आयाति। अत एव कथानां विकासयात्रा वैदिककालाद् आरभ्य अद्यावधि निर्बाधप्रसरा दरीदृश्यते। अद्रेरञ्चलात् निर्गच्छन्ती स्रोतोवहा यथा यत्र तत्र पाषाणसंघातैः संघर्षमवाप्य उच्छलन्ती क्वचिन्मन्द–द्रुतवेगा नृत्यन्तीव धरातलमभ्युपैति, ततश्च नद–नदी–ह्रदादिरूपाणि बिभ्रती स्वीयम–धुरास्वादवतीभिरद्भिः लोकांस्तोषयन्ती विभाति तथैव कथानामपि बहुलाः सरलाः जटिलाः मार्गाः प्रविततः भान्ति भूतले।

स्वीयानि दैनिकानि कर्माणि निर्वर्त्य मानवोऽतिरिक्ते समये मनोरंजनं समीहते। तत्पूर्तये एव कथानां विशालः संसारः दृश्य–श्रव्य– पाठ्यरूपेषु दृग्गोचरतां याति।

कथानां किमुद्देश्यम्? प्रायेण मनोरंजनं, मानवीयचरित्राणां सरसमंकनं, गृहे वा परिवारे वा समाजे वा राष्ट्रे वा परिव्याप्तानां समस्यानां मनोरममाकलनं तन्निदानं च, व्यवहारशिक्षणादि कथानां प्रमुखम् उद्देश्यं वक्तुं शक्यते।

बह्वायामं खलु कथाशिल्पमपि। नानाशैलीराश्रित्य कथाः कथ्यन्ते, तद्यथा–लघ्वाकाराः बृहदाकाराः, व्यवहारशिक्षाप्रदाः, प्रेरणात्मिकाः, पुराणेतिहाससम्बद्धाः, चरित्रचित्रणपराः, कठिनसंघर्षपूर्णाः, यथार्थचित्रणाः, आदर्शाभिमुखाः, परिहासप्रयोजनाः, विज्ञानपरिचायिकाः, चमत्काराधायिकाः, समस्याप्रधानाः, औत्सुक्यावसायिन्यः, व्यंग्यसंवलिताः, घटनाबहुलाः, रहस्यरोमांचसम्भृताः, भावनामुखराः आदि।

पशून् पक्षिणश्च पात्रीकृत्य विरचिताः पंचतन्त्रहितोपदेश–ईसब्नीतिकथाः विश्वविश्रुताःसन्ति। ग्रिममहोदयस्य परीकथाः, देशदेशान्तरेषु प्रथिताः लोककथाश्च

मनोरंजनेन साकं लोकाचारस्य व्यवहारस्य च ज्ञानाय परमोपयोगिन्यः सन्ति।

संस्कृते विद्यमानं सुविशालं कथासाहित्यम् अद्यापि देशविदेशानां लोकान् विस्मये निदधाति लेखकांश्च प्रेरयति। ब्राह्मणग्रन्थेषु उपनिषत्सु च मनोहराणि आख्यानानि समुपलभ्यन्ते। रामायण–महाभारत–पुराण–बृहत्कथा– कथा–सरित्सागर–बृहत्कथामंजरी–वेतालपंचविंशति– सिंहासनद्वात्रिंशिका–शुक–सप्तति–जातकमालादिकथाग्रन्थानां विश्वसाहित्येऽनुपमं स्थानं वेविद्यते।

अद्यतन्यः कथाः समस्याप्रधानाः सन्ति। समाज–राजनीतिगतं वैषम्यं मुखरीकुर्वत्यः एताः कथाः संस्कृतेऽपि प्रणीयन्ते कथाकारैः। अद्यतने यान्त्रिके युगे मुद्रणसौविध्यमहिम्ना कथानामजस्त्रः प्रवाहः पयःपूर इव सर्वतोदिशम् उद्दामवेगेन प्रसरन् विलोक्यते।

प्रौढानां पाठकानां कृते संस्कृते सर्वविधं विपुलपरिमाणं साहित्यं सुलभम्, किन्तु कोमलमतीनां बालकानां कृते तदभावः खेदजनकः। एतन्मनसि निधाय ममैष प्रयासः। अस्मिन् कथासंग्रहे जीवनस्य विविधेभ्यः क्षेत्रेभ्यः मनोरंजन – व्यवहारज्ञान–शिक्षा–नीति–परिहास–नैतिकमूल्य–सच्चरितानि आधारीकृत्य षष्टिः कथाः संकलिताः सन्ति। न केवलम् एतेन पाठकानां मनोरञ्जनं भविष्यति अपितु भावाभिव्यंजने, संस्कृतगिरो ललितप्रयोगेऽप्येष साहाय्यमाचरिष्यति।

उत्तरप्रदेशीय–संस्कृत–संस्थानं प्रत्यहं स्वीयमाभारं व्यनज्मि, येन 'कथामन्दाकिनी' नामैष कथासङ्ग्रहः नयनाभिरामं मुद्रणं विधाय प्राकाश्यमानायि।

दिनांकः १८–४–१९९८ | **विदुषां विधेयः**
डी–७५७ सरस्वती विहारः | **ओम्प्रकाशठाकुरः**
दिल्ली–११००३४

विषय-क्रम:

सत्यनिष्ठा



एकेन रामचन्द्राभिधेन कृषकेण कृषिभूमिः विक्रीता। चन्द्रदेवेन तस्मात् क्रीता। भूमिः पुष्कलम् उर्वरा आसीत्। तां प्राप्य चन्द्रदेवः प्रसन्नः जातः। यदा तेन हलेन सा भूमिः कर्षितुम् आरब्धा, हलस्य स्पर्शः केनचित् धातुपात्रेण अभवत्। उत्खननेन तत्पात्रं भूमेः निष्कासितं तेन। पात्रं स्वर्णमुद्राभिः पूरितम् आसीत्। चन्द्रदेवः तत्पात्रम् आदाय रामचन्द्रम् उपजगाम उवाच च, भ्रातः! भूमिं कर्षता मया एतत् कनकमुद्राभरितं पात्रं लब्धम्। एतद् गृह्यताम्।

तन्निशम्य रामचन्द्रः अकथयत्— बन्धुवर! मया तु भूमिः विक्रीता। भूम्यां यदस्ति, तत् तवैव। तत्र न मेऽधिकारः। चन्द्रदेवः अभाषत, भ्रातृवर्य! अहं तु भूमिं क्रीतवान्। तस्यां निगूढस्य धनस्य नाहं स्वामी।

एवं परस्परवाद–प्रतिवादपरयोः तयोः गृहे कश्चित् सम्बन्धी प्राप्तः। स मतिमान् आसीत्। सत्यनिष्ठयोः तयोः वार्ताविषयं ज्ञात्वा स चन्द्रदेवम् अपृच्छत्— किं कश्चित् तव पुत्रः पुत्री वा विवाहयोग्या अस्ति।

सोऽवदत्, अस्ति ममैका अष्टादशवर्षा कन्या। तन्निशम्य तेन उक्तम् यद्येवं ततः किं विवादेन। रामचन्द्रस्य सुशीलेन यूना पुत्रेण साकं स्वकन्यायाः विवाहः सम्पादनीयः। एतद् धनं च ताभ्यां समर्प्यताम्। तस्य वचनं सर्वैः अभिनन्दितम्। शुभे अहनि तयोः परिणयः सम्पन्नः जातः। तत् सौवर्णं वसु च ताभ्याम् अदीयत।

बुद्धिचातुर्यम्



पुराकाले श्रावस्तीनगर्यां प्रसेनजिताभिधः न्यायप्रियः राजा शासनं करोति स्म। तस्य शासनव्यवस्था प्रशंसनीया आसीत्। अकुतोभया तस्य प्रजा सर्वविधं सौख्यम् अन्वभूत्।

तदानीं कश्चिद् ब्राह्मणः कुतश्चिद् प्रदेशात् आगत्य तत्र निवसितुम्


आरेभे। तेन हि पौरोहित्यकर्मणा लब्धेन धनेन द्विसहस्रस्वर्णमुद्राः एकत्रीकृताः। ताः पात्रे निधाय वनप्रदेशे नागबलावृक्षस्य मूले निक्षिप्य रक्षितवान्। स प्रायःतत्र गत्वा मुद्राः विलोक्य तुष्यति स्म।

एकस्मिन् अहनि तत्र गतेन तेन भाण्डं रिक्तम् व्यलोकि। बहु दिनार्जितं महान्तं धनराशिं विनष्टं विज्ञाय स शोकार्तः जातः। केन चोरितं भवेद् इदं धनम् – इति ज्ञातुम् अशक्नुवन् स राज्ञे प्रसेनजिताय सर्वं निवेदितवान्। नृपःतम् आश्वास्य गृहं प्रैषयत्।

तदनु चोरं ग्रहीतुं राज्ञा एकः उपायः चिन्तितः। स शरीरवेदनाव्याजेन शय्यागतः नगरस्य वैद्यान् आकारयत्। तेभ्यः वेदनानिवारकम् औषधं गृहीत्वा पृष्टवान्– एषु दिनेषु केषां रोगिणाम् उपचारः क्रियते भवद्भिः, किम् औषधं च दीयते तेभ्यः। तैः रोगिणाम् औषधानां नामगुणादीनां परिचयः दत्तः। एकेन वैद्येन उक्तम् यन्मया मातृदत्तनामरोगिणे नागबलायाः मूलं क्वाथरूपेण सेवितुम् आदिष्टम्। राज्ञा मातृदत्तः आहूतः पृष्टश्च – नागबलामूलं कुतः प्राप्तम् ? सोऽवदत्, मम सेवकः वनाद् आनीतवान्। ततः तेन सेवकः आहूतः।

राजदण्डभयात् स सेवकः निजम् अपराधं स्वीकृतवान्, मुद्राश्च प्रत्यर्पितवान्।

सद्यः फलप्राप्तिः



कश्चित् नृपतिः प्रत्यहं प्रभाते अश्वम् आरुह्य नगरात् नेदीयसि एकस्मिन् उपवने भ्रमणार्थं याति स्म। एकस्मिन् दिवसे स पथि एकं दुर्बलदेहम् अशीतिवर्षदेशीयं वृद्धम् अवालोकत, यः स्वगृहाङ्गणे भूमिं खनित्वा किंचिद् वपति स्म। राजा अश्वाद् अवतीर्य तेन वृद्धेन सह एवम् आलपत्–

राजा — अयि महाभाग! किं वपति भवान्?

वृद्ध : — आम्रं वपामि।

राजा — आम्रः कदा फलिष्यति?

वृद्ध : — पंचभिः वर्षैः।

राजा — किं भवान् स्वजीवनकाले एतस्य फलानि खादिष्यति?

वृद्ध : — न जाने, तावत्कालपर्यन्तं जीविष्यामि न वा

राजा — तर्हि किं वृथा परिश्रमेण?

वृद्ध : — महाशय! सत्कार्याय कृतः परिश्रमः वृथा न भवति। मम पितामहः वृक्षान् आरोपयत् तस्य फलानि मम पित्रा सेवितानि। मम पित्रा रोपितानां पादपानां फलानि मया भुक्तानि। अधुना अहं वपामि, मम पुत्राः पौत्राश्च फलानि सेविष्यन्ते।

राजा — महाशय! अहं नमामि भवते। अहं भवदुत्तरेण सन्तुष्टः अस्मि। गृह्यतां स्वर्णमुद्रा। (वृद्धाय स्वर्णमुद्रां ददाति)

वृद्ध : — महाशय! भूरिशः धन्यवादाः। मया तु जीवनकाले एव फलं लब्धम्। स्वयं ब्रवीतु, भवान् किं परिश्रमः वृथा भवति?

मया अपि अभिज्ञातम् भवान् राजा इति। सादरं प्रणमामि। राजाऽपि तं वृद्धम् अभिवाद्य हयं च आरुह्य ततः प्रस्थितः।

किं तर्तुं जानासि



विश्वविद्यालयस्य कश्चित् प्रवाचकः नावम् आरूढः। तेन सुदूरं गन्तव्यम् आसीत्। नावा जलविहारस्य तस्य प्रथमः अवसरः आसीत्। बालसूर्यस्य किरणानां जलक्रीडां, वीचीनां नर्तनं, अम्भसाम् अपारं राशिम्, अरित्र माध्ययेन नौकाया अग्रेसरणम् आदि विलोकय स नाविकम् एवं पप्रच्छ—

प्रवाचकः — भो नाविक! किं त्वया कदापि गणितं पठितम्

नाविक: — न पठितम्?

प्रवाचक: — किं गणितम् अपि न पठितम्। नूनं तव जीवनस्य चतुर्थांश: व्यर्थं गत:। त्वया रसायनशास्त्रं, भौतिक–शास्त्रं तु पठितं स्यात् ?

नाविक : — ईदृशं मे भाग्यं कुत:? यदहं भौतिकशास्त्रं रसायन–शास्त्रं वा पठेयम्।

प्रवाचक: — नूनं त्वया अर्धं जीवनस्य व्यर्थतां नीतम्। वद, वद, त्वया आंग्लभाषा तु पठिता स्यात् ?

नाविक: — (ग्लानिम् अनुभवन्), महाशय! नाहं मात्रा पित्रा वा विद्यालयं प्रेषित:। कुत: पठेयम्!

प्रवाचक :— तर्हि तव जीवनस्य त्रिभागा: अपार्था: जाता:

अत्रान्तरे नदे जलप्लावनं समायातम्। लहरीणां वेगेन नौ: अकम्पत। पश्यतो: एव तयो: नौका जलपूरेण पूर्यते स्म। नाविक: प्रवाचकं सम्भ्रमेण अपृच्छत्– महाशय! तर्तुं जानासि? प्रवाचक: जलवेगदर्शनाद् भीत: अवादीत् अहं तर्तुं न जानामि। नाविक : अवोचत्, यदि तर्तुं न जानासि, तदा तव सर्वं जीवनं वृथा जातम्। अहं तु बाहुभ्यां नदं तीर्त्वा परं पारं प्रयामि। त्वं जलमध्ये विहारं कुरु।

आचरणेन बिना किं भविता?



एकदा केनचित् पुरुषेण कतिपये शुकाः पालिताः। स तेभ्यः अन्नकणान् दाडिमादिफलानि च ददाति स्म। ते कदाचित् पंजरस्थाः राम रामेति शब्दान् उच्चारयन्ति स्म, कदाचित् च पंजरात् मुक्ताः व्योम्नि विचरन्ति स्म। एकदा स जनः अचिन्तयत्, यत् एते कीराः मुक्तभावेन गगने विहरन्ति। कश्चिद् व्याधः आगत्य तण्डुलान् विकीर्य जालं च प्रसार्य एतान् यदि गृह्णाति, तदा किं करिष्यामि?

अकस्मात् तस्य मनसि एष विचारः प्रास्फुरत्, यदि अहम् एतान् कीरान् शिक्षितान् करोमि, तदा ते व्याधस्य जाले न पतिष्यन्ति।

एवं विचार्य स प्रत्यहं तान् एवम् अशिक्षयत्—

कश्चिद् व्याधः आयाति
साकं जालेनायाति
क्षिप्तं धान्यं वसुधायां
किमहं किमहम् अश्नीयाम्
जाले नाहं तिष्ठेयम्
धान्यं नाहं खादेयम्।

कतिपयैः दिनैः कारिताभ्यासाः ते शुका यत्र तत्र इदं गीतं गायन्ति स्म। गीतं गायतः तान् वीक्ष्य स जनः वीतचिन्तः जातः।

एकदा प्रभातवेलायां तस्य जनस्य अनुपस्थितौ कश्चिद् आखेटकः तत्र प्राप्तः।


स गृहसमीपवर्तिनि रिक्ते भूभागे जालं प्रसारितवान्, तण्डुलकणान् च विकीर्णवान्।

धान्यं विकीर्णं वीक्ष्य ते शुकाः अन्ये पक्षिणः च जाले समपतन्, अन्नभक्षणे च तत्परा अभवन्। सर्वे खगाः जाले निबद्धा जाताः।

बन्धनपतिता अपि शुका पूर्वाभ्यासेन तद् वाक्यकदम्बकम् आरटन्ति स्म —

कश्चिद् व्याध: आयाति
साकं जालेनायाति
क्षिप्तं धान्यं वसुधायां
किमहं किमहम् अश्नीयाम्
जाले नाहं तिष्ठेयम्
धान्यं नाहं खादेयम्।

लक्ष्मीभक्तः



कश्चित् जनः परमश्रद्धया श्रीलक्ष्मीदेव्या अर्चनां करोति स्म। एकदा तस्य भक्त्या प्रसन्ना सती भगवती लक्ष्मीः प्रकटीभूय तम् उवाच प्रसन्नाऽस्मि ते, वरं वृणीष्व!

स नरः लक्ष्मीम् प्रार्थयत – यदि भगवती मयि प्रसन्ना, तदा मम गृहं धनैः सुवर्णैश्च पूरितं स्यात्। लक्ष्मीः उवाच– न केवलं तव,

अपितु तव ग्रामस्य सर्वेषां जनानां गृहाणि धनैः संभृतानि भविष्यन्ति। इत्युक्त्वा लक्ष्मीः अन्तर्दधौ।

तस्याः वचनं विचारयन् स भक्तः रात्रौ अशेत। प्रातः प्रबुध्य स सर्वं गृहं धनमयम् अपश्यत्। एतद् अवलोक्य तस्य हर्षः हृदये न माति स्म। परितः धनस्य राशीन् दर्शं दर्शं स ननर्त। तस्य ग्रामवासिनां समेषां गृहाणि अपि स्वर्णैः रत्नैः च प्रोज्ज्वलानि आसन्। सर्वे जनाः परम सन्तुष्टाः अदृश्यन्त, तस्य लक्ष्मीभक्तस्य च स्तवनं कुर्वन्ति स्म यस्य प्रसादात् एषा धनवृष्टिः अजायत।

एकस्मिन् दिने स लक्ष्मीभक्तः पत्नीम् उवाच – भोजनम् आनय, क्षुधा बाधते। सा कथितवती अद्य तु गोधूमचूर्णं नास्ति, शाकम्ः अपि न विद्यते। आपणात् आनीयताम्।

लक्ष्मीभक्तः आपणं गत्वा आपणिकं गोधूमचूर्णं दातुं कथयति। सोऽवदत्– पूर्वसंचितं चूर्णं तु समाप्तिं गतम्। अन्यत् न आनीतं मया। सम्प्रति धनस्य आवश्यकताऽपि नास्ति। किं करिष्यामि वृथा परिश्रम्य। इत्युक्त्वा स विश्रामाय गृहं गतः।

तदा लक्ष्मीभक्तः शाकवणिजः आपणं गत्वा तं शाकं दातुम् अकथयत्। तस्य उत्तरम् आसीत् महाशय! कतिपयदिनेभ्यः शाकानि आगतानि एव न सन्ति। विपुलधनवन्तः सर्वे कृषकाः गृहाद् बहिः न गच्छन्ति। न ते क्षेत्रम् अवेक्षन्ते न धान्यं लुनन्ति। शाकस्य का कथा? कथं भविष्यति आवश्यकवस्तूनाम् आपूर्तिः, इति कथयन् स आसने अशेत।

तदा लक्ष्मीभक्तः क्षुधां शमयितुं मिष्टान्नविक्रेतारं गतवान्। स

आपणे शयानः आसीत्। मिष्टान्नं याचितः सोऽब्रवीत्, दुग्धं नागतम्। कुतो मिष्टान्नम्? कार्यचिन्ता अपि नास्ति। गृहे धनस्य राशयः सन्ति।

निराशीभूय स श्रान्ताभ्यां पद्भ्यां गेहं प्रत्यावृत्तः। तदा तस्य गृहे कतिपये शिष्टाः ग्रामवासिनः समवेता आसन्। ते सकरुणम् अब्रुवन्। भक्तप्रवर! किं कृतं त्वया! गृहेषु खाद्यं नास्ति, पातुं दुग्धं नास्ति। आपणानां द्वाराणि पिनद्धानि सन्ति। बालाः क्षुधया रुदन्ति। वयम् अपि अन्नाभावात् सीदामः। यदि क्षुधाशमनाय अन्नं नास्ति, किम् रत्नैः करिष्यामः? वयं तु यथापूर्वं भवितुम् इच्छामः। तदा वयं सुखिनः आस्म। श्रमहीनानाम् अस्माकं दुर्दशां विलोक्य कंचित् उपायं विधेहि।


तेषां परिदेवितम् आकर्ण्य स श्रीभक्तः तान् आश्वास्य विससर्ज। स स्वयम् अपि अन्नाद्यभावात् उद्विग्नः आसीत्।

सायन्तनीं पूजां निर्वर्त्य स पुनः आर्तभावेन लक्ष्मीम् आजुहाव। सा पुनः प्रकटीभूय तम् उवाच— भक्तवर! तव अभीप्सितं तु पूर्णमेव, इदानीं किं कामयसे?

भक्तः अब्रवीत्— मातः! क्षमस्व माम्। पूर्वम् अज्ञानावृतमतिः अहं धनम् एव प्रधानं सुख शान्ति–साधनम् अमन्ये। अधुना मया ज्ञातम् यत् यथा भोजनादिकं मानवाय अनिवार्यं, तथा कर्म अपि। विपुलवैभवजुषः वयं सर्वे अलसाः निष्क्रियाः च अभवाम। बहुधनता निष्क्रियता च मानवस्य शान्तिं हरतः। अतः कृपया प्रतिनिवर्तय स्वीयं वरम्। येन यथापूर्वं कर्मसु युक्ताः भवामः।

तथास्तु इत्युक्त्वा लक्ष्म्याम् अन्तर्हितायां सर्वं पूर्ववद् अभवत्। पुनः कर्मज्योतिः दिदीपे। सर्वत्र आनन्दः प्रासरत्।

औदार्यम्



कस्मिंश्चित् नगरे वसुदत्तनामा श्रेष्ठी वसति स्म। स परोपकारपरायणः मृदुभाषी च आसीत्। स निर्धनानाम् अन्नवस्त्रैः साहाय्यं करोति स्म।

एकदा तत्सविधे मलिने कर्गले लिखितम् एकं पत्रं समायातम्। तस्य अक्षराणि अपि सुवाच्यानि न आसन्। तस्मिन् पत्रे कश्चिद् बालकः स्वमातुः चिकित्सायै अन्नवसनेभ्यः च सहायतां प्रार्थयत। श्रेष्ठी तम् आमन्त्रयत्।

त्रिचतुर्दिवसानन्तरं स बालकः श्रेष्ठिनः समीपम् आययौ। कृशगात्रं मलिनवसनं रूक्षकेशजालं बालं वीक्ष्य स धनिकः तस्माद् तस्य गृहदशाम् अजानात्। तस्मै एकां स्वर्णमुद्राम् अयच्छत्।

मुद्रां प्राप्य बालः अवदत् श्रेष्ठिमहाभाग ! एकया मुद्रया मम कार्यं न सेत्स्यति। स तस्मै अपराम् एकां मुद्रां दत्त्वा अवदत्, किं द्वाभ्यां मुद्राभ्यां कार्यसिद्धिः भविष्यति ?

बालकः प्रत्यवदत्, एते द्वे मुद्रे मम आवश्यकतायाः अधिके स्तः। किम् अधिकेन करिष्यामि? अहं चिकित्सादिव्ययात् अवशिष्टं राशिं प्रत्यर्पयिष्यामि।

श्रेष्ठी स्वकर्मचारिभिः सुनिभृतं तस्य गृहदशाम् ज्ञातवान्। अग्रिमे दिने बालः आगत्य अवशिष्टं राशिं प्रत्यर्पितवान्। बालकस्य सत्यवादितां निष्ठा च दृष्टवा वसुदत्तः तस्य मातुः चिकित्साम् अकारयत्। भोजनाच्छादनस्य व्यवस्थां कृत्वा स तं उत्तमे विद्यालये अध्ययनाय प्रैषयत्।

आत्मा द्रष्टव्यः



एकदा दशभिः सुहृद्भिः विचारितं यद् वयम् इतः स्थानात् भिन्नासु दिशासु यामः। सायंकाले वयं पुनः अमुके स्थाने संगताः भविष्यामः।

सर्वे प्रस्थिताः। सर्वेषां गन्तव्यं भिन्नम् आसीत्, पन्थानः अपि भिन्ना, किन्तु सायं समये संकेतस्थानम् एकम् आसीत्।

तेषु कश्चित् तीव्रवेगेन, कश्चित् मन्दगत्या अलचत्। सर्वं दिनं भ्रान्त्वा सर्वे संकेतस्थलं प्राप्ताः। पुनः तैः चिन्तितम् यद् वयं दश सखायः आस्म। सर्वे प्राप्ताः न वा, गणना करणीया।

सर्वे पंक्तौ स्थिता अभवन्। तेषु एकः नवपर्यन्तं गणनाम् अकरोत्।

एकस्य सुहृद: अनुपस्थित्या सर्वे चिन्ताकुला: जाता:। तदा अपर: गणनां चक्रे। सोऽपि नवसंख्यान्तं गणितवान्।

तान् चिन्ताकुलान् दृष्ट्वा तेन मार्गेण गच्छन् कश्चित् पान्थ: तान् चिन्ताकारणम् अपृच्छत्। तेषां चिन्तां हर्तु स तान् पंक्तौ स्थातुम् आदिशत्। दशसंख्यापर्यन्तं गणयित्वा सोऽवदत् यत् गणनाकर्ता आत्मानं न गणयति स्म। अत: भ्रान्ति: जाता।

वस्तुत: वयं संसारे आत्मानं विस्मराम: अत: संसार: अपूर्ण: प्रतीयते। वेदान्तदर्शनम् शिक्षयति प्रथमम् आत्मा अभिज्ञातव्य: पश्चात् संसार:।

दृढ़ता



एकस्मिन् जलपोते कस्यचित् निर्धनपरिवारस्य बालकः सेवारतः आसीत्। स सदा प्रसन्नेन मनसा निपुणतया च प्रदत्तं कार्यं सम्पादयति स्म। एकदा तस्य कार्येण संतुष्टः सन् पोतसंचालकः तस्मै उत्तममद्यं पातुं ददौ।

बालकः मद्यं स्वीकृतं नाकरोत्। संचालकः पुनः अनुरोधं चकार किन्तु बालकः विनम्रतया अवदत्–मद्यसदृशं हानिकरं पेयं नैव पास्यामि।


एतया अवज्ञया कुपितः संचालकः तं दण्डयितुम् उद्यतः अभवत्

किन्तु दृढनिश्चय: बाल: सेवापरित्यागाय अपि तत्पर: आसीत्।

तस्य तादृशं भावं परिज्ञाय संचालक: तं पप्रच्छ—केन विशेष–हेतुना त्वम् ईदृशं मूल्यवत् मद्यं न स्वीकरोसि।

बालोऽवदत्—मम पिता प्रसिद्ध: मद्यप: आसीत्। मद्यपानेन एव नैकरोगै: आक्रान्त: स कालकवलित: जात:। पितरि दिवं प्रयाते मम माता मत्त: प्रतिज्ञाम् अकारयत् यदहं जीवने कदापि मद्यं न सेविष्ये। तां प्रतिज्ञां पालयन् अहं भवता उपहृतं मद्यं न स्वीकरोमि। अत: क्षम्यतां मम धाष्ट्र्यम्। संचालक: तस्य मानसीं दृढताम् अभिलक्ष्य प्रससाद तस्मै पुरस्कारं च प्रादात्।

श्रेयसां पन्थाः



कश्चित् नरपतिः मृगयाप्रसंगेन अश्वमारुढः एकाकी गहनं वनम् अविशत्। मध्याह्नं यावत् स इतस्ततः बभ्राम। श्रान्तो भूत्वा स एकस्य महतः गर्तस्य समीपे उपाविशत्। तस्मिन् गर्ते नव जातेन शिशुना सह एकां लोमशां वीक्ष्य विचारयामास—एषा लोमशा किमर्थं गर्तं गता? एषा स्वयं गर्ताद् बहिः आगन्तुं न शक्नोति गर्ते किमपि भक्षणीयं वस्तु नास्ति। किं खादित्वा जीवति ? नूनम् आसन्नप्रसवा इयं कथंचिद् गर्ते पतिता स्यात् तत्र चेयं पुत्रं जनितवती।

असौ भूपतिः पुनः विचारमग्नः जातः—कथयन्ति जनाः यत् परमेश्वरः सर्वेभ्यः भोजनं ददाति। अत्र स्थित्वा पश्यामि एषा किं खादति इति। एवं चिन्तयतः तस्य होराद्वयं यातम्।

तदैव तेन सिंहस्य वनं कम्पयद् घोरं गर्जनं श्रुतम्। पशवः भयाद् इतस्ततः पलायितुम् आरेभिरे। नृपोऽपि वृक्षम् आरूढः। तत्र स्थितः परितः निपुणं निरीक्षमाणः नृपः किं पश्यति—यत् सिंहः मृगम् एकं निहत्य तं दन्तैः प्रगृह्य वेगात् इतः आयाति। राजा भयेन अकम्पत इव।

ततः सिंहेन बलात् उत्पात्यमानः मृगः गर्ते अपतत्। सिंहः प्रधावन् क्षणादेव अक्ष्णोः अगोचरः जातः।

सिंहे गतवति नृपः वृक्षाद् अवरुह्य यदा गर्ते दृष्टिं क्षिपति—तदा लोमशां शिशुना सह सानन्दं खेलन्तीं मृगमांसं च खादन्तीं पश्यति। एतद् अवलोक्य नृपः दृढं विश्वसिति यत् परमेश्वरः परमकारुणिकः अस्ति। स सर्वेषां योगक्षेमं वहति। क्षुधार्तायै लोमशायै तेनैव सिंह—माध्यमेन मृगः प्रेषितः। वयं संसारिणः प्रभोः अवलम्बनं हित्वा व्याकुलाः इति विचार्य स राज्यचिन्तां परित्यज्य तपसि लीनः जातः। वने ध्यानमग्नस्य तस्य द्वे दिने व्यतीते, किन्तु स कमपि भोजनम् आदाय आयान्तं न पश्यति। क्षुधया पिपासया च आर्तस्य तस्य दशा शोचनीया जाता।

तेन पथा गच्छन् कश्चन महात्मा तस्य सर्वं वृत्तं विज्ञाय एवम् उपादिशत्—राजन्! त्वं स्वधर्मं विहाय अत्र तपः करोसि। एतत् साम्प्रतं नास्ति। यः कर्तव्यं विस्मरति, पौरुषं च जहाति, तस्मिन् कदापि परमात्मा न प्रसीदति अतः स्वं राज्यं गत्वा प्रजापालनात्मकं कर्तव्यम् आचर। कर्तव्यपालनम् एव श्रेयसां पन्थाः।

सङ्गत्याः प्रभावः




एकेन आखेटकेन वने विहरता वृक्षस्थौ द्वौ शुकशावकौ दृष्टौ। ततस्तेन निःशब्दं वृक्षम् आरुह्य तौ धृतौ। पश्चात् स तयोः विक्रयाय आपणं गतः। तत्र होराद्वयस्य भ्रमणपरिश्रमेण स एकं शुकं पुण्डरीकनाम्नः आचार्यस्य हस्ते विक्रीतवान्, अपरं कश्चित् यवनः अक्रीणात्। यवनः मद्यपः द्यूतप्रियश्चासीत्। तस्य गृहे सर्वे सदस्याः परस्परं दुर्व्यवहारं कुर्वन्ति स्म। तत्र परस्परताडनं, भर्त्सनं अपशब्दप्रयोगश्च सामान्या प्रवृत्तिः आसीत्।

शुकः प्रकृत्या अनुकरणशीलो भवति। यवनस्य शुकोऽपि दुर्वचनप्रयोगे निष्णातो जातः। यदा स गालिं ददाति, सर्वे हसन्ति स्म, अपशब्दानाम् उच्चारणाभ्यासम् अपि कारयन्ति स्म।

प्रथमः शुकः एकं गुरुकुलं नीतः। तत्र आचार्यपुण्डरीकः शिष्यान् वेदम्, उपनिषदम्, गीतां, व्याकरणशास्त्रम् आदि अध्यापयति स्म। शुकः अपि श्लोकानां मन्त्राणां च पाठं श्रुत्वा तदेव ब्रूते स्म। एवं तौ शुकौ भिन्ने वातावरणे वसितुम् आरभेताम्। पुनः कदाचित् तौ शुकौ केनापि अपहृत्य विक्रीतौ। अधुना तौ कस्यचित् महाधनस्य जनस्य भवनं प्रापतुः। एकस्मात् शुकात् मंत्रान् मांगलिकपद्यानि च निशम्य स धनिप्रवरः अतितरां प्रासीदत् किन्तु यदा अपरस्मात् शुकात् सः अपशब्दान् अभद्रां वाचं च अशृणोत्, स सेवकं तं शुकं हन्तुम् आदिशत्। तदैव प्रथमः शुकः प्राह—नायं हन्यतां, नायं हन्यताम्। यतः एष संगस्य प्रभावः श्रृणु तावत्—

अहं मुनीनां वचनं शृणोमि
शृणोति चासौ यवनस्य वाक्यम्।
न चास्य दोषो न च मे गुणोऽयम्
संसर्गजा दोषगुणा भवन्ति।

तारतम्यम्



अकबर—बीरबलयोः प्रभूताः कथाः श्रुता भवेयुः भवद्भिः। अत्र वयं विश्वविश्रुतस्य संगीतविदः तानसेनस्य चर्चां चिकीर्षामः—

सम्राट् अकबरः गुणिगुणगणपरीक्षकाणाम् अग्रणीः आसीत्। अत एव तस्य राजसभा विलक्षणप्रतिभावद्भिः पण्डितैः कविभिः कलाकारैश्च सुमण्डिता भाति स्म। स समये समये प्रश्नानां समाधाने, विकटसमस्यानां प्रतीकारे मनोरञ्जने च तेषां प्रतिभायाः सदुपयोगं कुरुते स्म। सङ्गीतसम्राट् तानसेनः तस्य सदसः अनर्घं रत्नम् आसीत्।

एकदा अकबरः तानसेनं प्रशंसन् अकथयत् यत् त्वया सदृशः संगीतविद् नास्ति कोऽपि भुवस्तले।

आत्मश्लाघां श्रुत्वा तानसेनः सविनयम् अवादीत्—महाराज ! एतत् सत्यं नास्ति। मत्तः अपि प्रभूतं कुशलः सङ्गीतमर्मविदाम् अग्रगः मम गुरुः श्री हरिदासः वृन्दावने वसति। तस्य मम च गायने महद् अन्तरम्।

अकबरः उत्सुकतां प्रकटयन् उवाच किं तव गुरुवर्या अत्र आयास्यन्ति? तानसेनः प्रत्युवाच—असौ हि लोकैषणाया विमुखः, श्रीहरिप्रीत्यर्थं संगीताराधनरतः वृन्दावनं न जहाति।

अकबरः उवाच, यदि एवं, तर्हि आवां तत्र गत्वा तत्संगीतामृतम् आपिबावः, तद्दर्शनैः आत्मानं च पावयावः।

तानसेनः अवदत्, मन्ये, कयाचिद् युक्त्या एव भवान् तत्संगीतं श्रोतुं शक्ष्यति। इत्युक्त्वा कृतगमननिश्चयौ तौ वृन्दावनं प्राप्तौ। गुरुम् उपगम्य तानसेनः भक्त्या तं ववन्दे। अकबरः कुटीराद् बहिः अतिष्ठत्।

अथ कुशलप्रश्नानन्तरं तानसेनः गुरोः आज्ञया एकं रागबद्धं गीतम् अगायत्। किन्तु जानन् एव स तं रागं विस्वरम् अकरोत्।

श्री हरिदासः तस्य रागस्य शुद्धं रूपं निर्दिशन् स्वयम् अगायत्। बहिः तिष्ठन् अकबरः तत्सङ्गीतसौन्दर्यसुधास्नातः इव आत्मानं धन्यं मेने।

ततः अकबरेण पृष्टम्—तव संगीते गुरुवर्याणां व संगीते ईदृशः भेदः कथम् ? तानसेनः सस्मितम् अवदत् राजन् ! अहं भवते गायामि। सः अखिल ब्रह्माण्डनायकाय परमेश्वराय गायति।

अर्थशुचिता



नौशेरवांऽभिधानः एकः भूपतिः मृगयाप्रसंगेन वनं गतः। सर्वं दिनं पशूनाम् आखेटं कृत्वा सायं सहचरसमेतः स एकं ग्रामं प्रपेदे। तत्र रात्रौ अवस्थानं निश्चित्य शिविरम् अकारयत्। सर्वे जनाः स्वकृत्येषु संलग्नाः अभवन्। पाचकः अपि सर्वेषां कृते भोजनव्यवस्थायां व्यापृतः अभूत् किन्तु भोज्य सामग्रीषु लवणम् अनवलोक्य स भीतभीतः सन् नृपतिमभ्येत्य न्यवेदयत्, यत् असावधानेन मया लवणं नानीतम्। मां क्षन्तुम् अर्हति भवान्।


भूपतिः तम् आदिशत्, मूल्यं दत्त्वा लवणम् आनय इति। तस्मिन् गते अमात्यः करौ बद्ध्वा सविनयं नृपम् अपृच्छत्–राजन् ! श्रीमता योऽयं पाचकः मूल्यदानपूर्वं लवणम् आनेतुं प्रेषितः, नाहं भवतः आशयं वेद्मि। यतो हि लवणं प्राचुर्येण सुलभत्वात् निर्मूल्यपदार्थ इव विद्यते। तर्हि का आवश्यकता मूल्यदानस्य।

महीपतिः सस्मितम् उवाच–न जानीषे अस्य रहस्यम्। प्रायशो लोकाः लघुषु वस्तुषु प्रमादं दर्शयन्ति, पश्चात् स तेषां स्वभावो जायते। महत्सु विषयेषु या अनवधानता दृश्यते, तस्या मूले तादृशः स्वभाव एव हेतुः। अपरं पश्य यदि राजा प्रजाया उद्यानात् एकं फलं त्रोटयितुं सेवकम् आदिशति, तस्य कर्मचारिणः सर्वम् उद्यानम् एव ध्वंसयन्ति। श्रुतं त्वया–

यद्यदाचरति श्रेष्ठस्तत्तदेवेतरो जनः।
स यत्प्रमाणं कुरुते लोकस्तदनुवर्तते॥

अत एव मया लवणस्य मूल्यं दातुम् आदिष्टः स पाचकः।

श्रमो विजयते



अमेरिकादेशस्य एकस्मिन स्थाने सैनिकानाम् आवासाय निर्माणकार्यं प्रचलद् आसीत्। तत्र द्वारादिनिर्माणहेतोः काष्ठस्य गुरुतरः खण्डः नीयते स्म। केचित् सैनिकाः बृहत्कायं तं काष्ठखण्डं भूमेः उत्थाप्य यानम् आरोपयितुं यतमानाः आसन्। किन्तु काष्ठस्य अतिभारवत्त्वात् बहु प्रयत्य अपि ते अक्षमा जाताः।

तेषां सैनिकानाम् एकः नायकः अपि आसीत् यः दूरतः एव अधिकबलप्रयोगाय तान् प्रेरयति स्म।

अत्रान्तरे कश्चित् तुरगाधिरूढः पुरुषः तत्र प्राप्तः। स भारवहने अक्षमान् सैनिकान् विलोक्य नायकम् अवदत्– किं न पश्यति भवान् यत् यत्नवन्तः अपि इमे कार्यसम्पादने प्रभवः न सन्ति। यदि भवान् तेषां सहयोगं करोति, तदा कार्यं सुकरं स्यात्।


नायकः प्रोवाच – किं न वेत्ति भवान् अहम् एषाम् अधिकारी अस्मि। कथम् एतैः सह कार्यं कुर्याम्?

तत्कथनं श्रुत्वा सः अश्वसादी अश्वाद् अवततार निजं कोट– परिधानं च अवतार्य भूमौ न्यदधात्। ततः असौ काष्ठखण्डस्य उन्नयने सैनिकैः साकं बलं प्रायुङ्क्त। काष्ठखण्डः याने अरोपितः अभवत्। सर्वे तस्य सहयोगं प्राशंसन्। नायकः अपि धन्यवादं वितीर्णवान्।

तदनु स आगन्तुकः पुनः अश्वम् आरुह्य नायकं बभाषे – महाशय! यदा कदाचित् ईदृशः अवसरः आपतेत्, प्रधानसेनापतिः वाशिंगटनः स्मर्यताम्। स पुनरपि आगमिष्यति।

स्वसेनापतिं वाशिंगटनम् अभिज्ञाय नायकः लज्जावनम्रः भूत्वा क्षमां ययाचे।' वाशिंगटनः अभाषत–कर्तव्ये कर्मणि गुरुता लघुता वा न भवति। एतद् भूयोभूयः अवधेयम्।

चारित्र्यम्



कल्याणदुर्गं विजित्य ततः आनीतं धनं अन्यद् वस्तुजातं च निरीक्षमाणः छत्रपतिः शिववीरः सेनापतिं सोनदेवं पृच्छति—अत्र शिविका किमर्थम् आनीता। कोऽस्ति शिविकायाम्।

सोनदेवः प्रत्युत्तरति—महाराज! सुल्तान अहमदस्य पुत्री शिविकायां विराजते। सर्वेषु अरातिषु पलायितेषु प्रासादस्य अन्तः पुराद् आनीता एषा सुन्दरी भवते उपहारभूता।

तच्छ्रुत्वा शिववीरः रुष्टः सन् अब्रबीत् यत् अस्माकं वैरं मुगलैः साकम्। वयं तैः सह युध्यामहे। नास्माकं नारीभिः कश्चिद् विद्वेषः।

भरतीया वयं सम्मानदृष्ट्या ताः पश्यामः। कामं ताः वैरिपक्षस्य भवेयुः। इमाम् अत्र आनीय त्वया उचितं न कृतम्। एतां सम्मानपूर्वकं पितुः गृहं प्रेषय।

तदैव शिविकायाः आवरणम् अपसार्य सा अनिन्द्यसुन्दरी बहिः आगच्छत्। शिववीरम् उपेत्य तं प्रणमन्ती अवदत्– महाराज! भारतीयानां चारित्र्यम् उदात्तभावनां च विलोक्य विस्मयविमुग्धाऽस्मि। अपहरणकाले मया चिन्तितम् आसीत् यत् क्रूरपुरुषाणां हस्तगता अहं अकल्पितां कामपि दुर्दशां गमिष्यामि। किन्तु मम चिन्तनम् मृषा अभवत्। अहं मूर्तं सदाचारं भवन्तं पुनः पुनः वन्दे।

अपूर्वलावण्यवत्याः तस्याः वचांसि निशम्य शिववीरः विहस्य अवदत्। यदि मम जननी त्वादृशी सुन्दरी अभविष्यत् तदा अहम् अपि त्वादृशः रूपवान् अभविष्यम्।

तदनन्तरं शिववीरसंकेतेन सा सम्मानपुरस्सरं पितुः समीपे प्रापिता।

परस्परं भावयन्तः



पुरा अफ्रीकादेशस्य 'कमेरा' प्रदेशे कश्चित् हब्शीजातीयः नृपः धनमदोन्मत्तः सर्वान् अवज्ञया वीक्षते स्म। प्रजा तस्य अत्याचारैः दुःखिनी आसीत्। तस्य सेवकाः, राजकर्मचारिणः, मन्त्रिणः अपि तस्य उग्रस्वभावात् बिभ्यति स्म। स कदा रुष्टो भूत्वा दण्डयेत्– इति कोऽपि न जानाति स्म। एकदा राजसभायां सत्तामददृप्तेन तेनोक्तम्– राज्यस्य सर्वे जना मम सेवकाः सन्ति, अहं तेषां स्वामी अस्मि।

तद्वचनं श्रुत्वा सर्वे भयात् मौनम् आस्थिताः, किन्तु तत्र एकः कम्पमानदेहयष्टिः यूनुस नामधेयः स्थविरः अमात्यः उत्थाय सविनयम्

अवदत्—राजन्, एतत् सत्यं नास्ति। संसारे सर्वे जनाः परस्परं सेवमाना जीवन्ति।

नृपः तत् श्रुत्वा क्रोधाद् अब्रवीत्—किं प्रमाणम्? सोऽब्रवीत्—राजन्! संसारस्य सर्वाणि कार्याणि परस्परं सेवया सहयोगेन च चलन्ति।

नृपः सगर्वम् उवाच – किम् अहम् अपि तव सेवकः अस्मि?

मन्त्री विनयेन अवदत्— मम एषः अभिप्रायः नास्ति। किन्तु यदि जनाः परस्परं सेवां न कुर्युः, तदा संसारस्य प्रगतिः रुद्धा स्यात्।

रोषाकुलेक्षणः राजा पुनः अभणत्— यदि अद्य सायंकालपर्यन्तं त्वं मां निजसेवकं न साधयसि, तदा मृत्युदण्डं लप्स्यसे, यदि साधयसि, तुभ्यं गवां शतं दास्यामि।

तदा मध्याह्नवेला आसीत्। वृद्धत्वाद् दुर्बलदेहः वेत्रयष्टिसाहाय्येन कृच्छ्रतया कतिचित् पदानि अचलत्। तदैव कश्चिद् भिक्षुकः तं भोजनं ययाचे।

राजसभा—समीप—स्थित—पाकशालायाः भोजनं गृहीत्वा यूनुसः भिक्षुकाय दातुं चलितः। तस्य एकस्मिन् हस्ते भोजनं, द्वितीये हस्ते वेत्रयष्टिः आसीत्।

सहसा तस्य यष्टिः पतिता। यष्ट्या विना स भूमौ स्खलित्वा पतेत् इति आशंका जाता। स राजानं प्रार्थयत—देव! कृपया यष्टिः मम हस्ते दीयताम्, अन्यथा अहं पतिष्यामि।

राजा यष्टिं ग्राहितवान्। यूनुसः उच्चैः विहस्य अकथयत्— राजन्! भवता मम सेवा कृता, मया भिक्षुकस्य। एवं सर्वे अन्योन्यं सेवन्ते।

नृपस्य दर्पः अगलत्। यूनुसः उवाच – नाहं गोशतं वाञ्छामि। एतत् निर्धनेभ्यः दीयताम्। प्रजानां सेवाकर्मणि मनो नीयताम्। प्रजाजना– अपि भवन्तं सेविष्यन्ते, नृपः तद्वचोभिः बोधम् आपेदे।

पणकर्ता



कश्चित् जनः राजकीयकार्यालये सेवारतः आसीत्। स स्वसहकर्मिभिः साकं पणं कृत्वा व्यवहारं करोति स्म। तद् यथा— यदि अमुकं कार्यं इत्थं न स्याद् अहं तुभ्यं शतं दास्यामि। अन्यथा त्वत्तः द्विशतं ग्रहीष्यामि इति।

सर्वे तस्य एवंविधेन पणपूर्वकेण व्यवहारेण सशंका जायन्ते स्म। अस्मिन् कार्ये स ईदृशः प्रवीणः आसीत् यत् सदा विजयी भवति स्म।

एकदा तत्य स्थानान्तरणं जातम्। तस्य स्वभावेन पूर्वकारित परिचयः

विभागाध्यक्षः तम् अपृच्छत्— श्रुतं मया, त्वं पणेन जनान् वंचयसि । किं सत्यम् इदम् ?

स सविनयम् अवदत् श्रीमन्! नाहं वंचयामि। अहं तु स्वयम् अस्मात् स्वभावात् उद्विग्नो भवामि। किं कुर्याम्, भवतः आकृतिः सूचयति यत् पृष्ठस्य वामभागे कटितटे एकं तिलम् अस्ति। यदि न स्यात्, पंचशतानि दातुम् उद्यतः अस्मि।

विभागाध्यक्षः तं दण्डयितुम् इच्छति स्म, येन स ईदृशं व्यवहारं मुञ्चेत्। स त्वरितम् एव सर्वेषां समक्षे कञ्चुकम् अवतारितवान्। तत्र कटिभागे तिलं नासीत्। पराजितः भूत्वा स सहर्षं पंचशतानि ददौ।

सप्ताहाद् अनन्तरं विभागाध्यक्षेण ज्ञातं यत् पूर्वस्मिन् कार्यालये तेन सहस्ररूप्यकाणां एवंविधः पणः कृतः आसीत् यत् सः प्रथमे एव दिने विभागाध्यक्षं कंचुकम् अवतारयितुं विवशं करिष्यति।

प्रीतिभोजः



चरूशलमदेशस्य शासकः सोलोमनः प्रजापालनरतः न्यायप्रियः च आसीत्। तस्मिन् शासति देशः सर्वतोमुखीं प्रगतिं कुर्वन् चकासे। प्रजाजनाः राजनि अस्निह्यन्, राष्ट्रस्य समृद्ध्यै च सर्वदा यत्नपराः आसन्।

तत्र बावसीनामा कश्चिद् अतिकृपणः श्रेष्ठी अवसत्। स कुसीदेन

द्रव्यं ददाति स्म। अतुलं वैभवम् ऐश्वर्यं च दधानः अपि स परेभ्यः आत्मार्थेऽपि च धनस्य व्ययं नैव कुरुते स्म । पत्न्यां पुत्रेषु च धनस्य व्ययः भविष्यति, इति विचार्य असौ विवाहम् एव न अकरोत्। सेवकैः कर्म कारयित्वा अपि स तेभ्यः भोजन–भृति दानेऽपि मन्दादरः आसीत्।

एकदा देशे दुर्भिक्षस्य भीषणः प्रकोपः समजायत। लोकाः अन्नाभावात् दुःखिनः आसन्। नृपतिः सोलोमनः प्रजानां दुःखैः सन्तप्यमानः राज्यस्य अन्नभाण्डागारेभ्यः अन्नवितरणेन सेवानिरतः बभूव, किन्तु बावसी–भाण्डागारेषु अन्नस्य निवहाः निलीनाः आसन्।

राज्ञा सोलोमनेन बावसीविषये सर्वं श्रुतम्। तं शिक्षयितुं स एकम् उपायम् अचिन्तयत्। बावसी प्रीतिभोजे निमन्त्रितः। राजनिमन्त्रणं प्राप्य बावसी अतिप्रसन्नः अजायत। जीवने प्रथमवारं तेन राज्ञा साकं स्वादुभोजनानां, मधुराणां पेयानां, नानाविधानां चोष्याणां लेह्यानां च आस्वादैः रसनां रसयितुम् अवसरः लब्धः आसीत्। राजसम्मानस्य कल्पना अपि तस्य मानसं सुखयति स्म।

प्रीतिभोजः तु सायंकाले भविष्यति, तदाऽहम् अधिकाधिकं भोजनं भक्षयेयम् इति धिया स प्रातर्भोजनं विजहौ। भोजनस्य प्रतीक्षायां कथञ्चित् समयम् अतिवाह्य स सायंकाले नवीनवेषभूषया अलङ्कृतः सन् राजप्रासादं प्रति सगर्वं चचाल।

तस्य अभिनन्दनाय कर्मचारिणः बद्धपंक्तयः आसन्। राजप्रासादस्य भवनानाम अपूर्वाम् अभिख्यां पश्यन् स तत्र प्राप्तः यत्र सोलोमनः महार्घे आसने विराजते स्म। राजा स्वयम् उत्थाय तस्य अभिनन्दनं

चकार। तदा तौ भोजनकक्षं गतौ, यत्र केवलं द्वाभ्यां कृते आसने शोभेते स्म।

उभौ उपविष्टौ। नृप: कुशलप्रश्नानन्तरं तं तस्म व्यापारादिविषये पृष्टवान्। सोऽपि स्मितवदन: राज्ञ: प्रश्नानां यथोचितम् उत्तरम् अददात्।

तत: भोजनम् आरब्धम्। अनेके सेवका: परिवेषणे नियुक्ता: आसन्। प्रथमं सोलोमनस्य समक्षे मधुरं पेयम् अस्थाप्यत। स तत् पपौ। पश्चात् बावसीसम्मुखे एक: सेवक: पेयपात्रं दधौ। किन्तु पानात् पूर्वम् एव अपर: सेवक: पात्रम् अनयत्। एवं क्रमश: अनेकेषां खाद्यानां पेयानां चोष्य–लेह्यादिभोज्यवस्तूनां परिवेषणम् अभूत्। राजा तत्सर्वम् रुचिपूर्वकम् आस्वादयत्, व्यञ्जनानां पुन: पुन: प्रशंसां च अकरोत् किन्तु बावसीसमक्षे एक: सेवक: भोजनम् आनयति, तत्क्षणम् एव अपर: अपनयति स्म किन्तु शिष्टाचारवशाद् वा राजभयाद् वा किञ्चिद् अखादित्वा अपि बावसी भोजनस्य भूरि–प्रशंसाम् अकार्षीत्।

प्रीतिभोजे अवसिते बावसी गृहं गन्तुम् इयेष किन्तु तस्य सम्माने आयोजिते नृत्यसङ्गीतमहोत्सवे नृप: तं रङ्गशालाम् अनयत्। द्विहोरावधि कार्यक्रम: अचलत्। क्षुधार्त: बावसी कथं नृत्यसङ्गीते अभ्यनन्दत् इति अनुमातुं शक्यते।

सम्पन्ने सङ्गीतमहोत्सवे राजवचनात् अनिच्छन् अपि बावसी राजप्रासादे शायित:। क्षुधितस्य तस्य निद्राऽपि क्वापि न्यलीयत।

प्रातर्वेलायां बावसी गमनाय अनुमतिं ययाचे। नृपति: तं प्रणम्य

गृहाय यातुं विससर्ज। प्रस्थानसमये बावसी करौ बद्ध्वा राज्ञे न्यवेदयत्, यत् क्षुधार्तानां का दशा भवति, इत्यहं भवत्कृपया अवगतवान्। मम अन्नभाण्डागारा: अकाल–ग्रस्तानां कृते मुक्ता:सन्ति। अद्य शिक्षितं पाठम् आजीवनं स्मरिष्यामि।

अनासक्तः



एकः नरपतिः राजकर्मभ्यः उद्विग्नः भूत्वा स्वगुरोः समीपे गतवान् निवेदितवाान् च, भगवन् ! प्रजापालनात्मकं कर्म अतिकठिनं कष्टप्रदं च। प्रतिदिनम् अनेकाः विषमाः समस्याः उपस्थिताः भवन्ति। एकां समस्यां समादधामि, अपरा समुदेति। कार्येषु बहूनि विघ्नानि समुपस्थाय मम चेतः व्यग्रीकुर्वन्ति। अथ च जनानां मध्ये विवादानां निर्णये, जनहितयोजनानां च क्रियान्वयने व्यासक्तचित्तः अहम् उद्विग्नताम्

अनुभवामि। नानाचिन्ता: क्लेशयन्ति। निद्रा अपि रूष्टा भूत्वा क्वचिद् विलीना। किं करोमि क्व गच्छामि ? किं राज्यं परित्यजानि ? भवाान् एव मम मार्गदर्शनं करोतु।

गुरु: अभ्यधात्, राजन् ! यदि खेदं वहसि, राज्यं परित्यज किन्तु योग्यस्य प्रशासकस्य अभावे सर्वत्र असन्तोष: अनवस्था च समुदेष्यत:। भवान् राज्यभारं पुत्राय किं न प्रयच्छति ?

राजा अवदत्, पुत्रस्तु बाल्ये वयसि वर्तमान: राज्यभारवहने असमर्थ:। भवान् कञ्चिद् अन्यम् उपायं निर्दिशतु।

क्षणं विचार्य गुरु: अवादीत्, यदि तव सम्मतं स्यात्, मह्यम् समर्प्यतां राज्यम्। राजा सहर्षम् उवाच, भवता तु मम सर्वा चिन्ता निराकृता। दत्तं मया भवते राज्यम्। गुरु: पुन: तम् अपृच्छत्, सम्प्रति किं करिष्यति भवान्। राजा अवदत्, अहं किञ्चिन्मात्रं धनम् आदाय वने तप: चरिष्यामि।


गुरु: विहस्य अवदत्, राज्येन सह राजकोषे अपि ममाधिकार: जात:। अत: धनम् आदातुं नार्हसि।

राजा प्रत्यवदत्, अहं सेवाकार्यं कृत्वा धनम् आप्स्यामि। गुरु: उवाच, यदि सेवा एव करणीया, तदा मम प्रतिनिधि: भूत्वा राज्यं शाधि । किन्तु एतत् सम्यक् अवधारये:, यत् राज्ये तवाधिकार: नास्ति। त्वं केवलं मम प्रातिनिध्यं वहसि।

राजा गुरोः वचनं शिरसा प्रधार्य तस्माद् आशिषः च स्वीकृत्य प्रतिनिवृत्तः, राज्यं च शशास।

मासान्ते पुनः गुरुणा पृष्टः अवदत्, सम्प्रति सर्वं कार्यम् अक्लेशेन सम्पादयामि। काऽपि चिन्ता मां न दुनोति। रात्रौ प्रगाढनिद्रासुखम् आसादयामि। सम्प्रति नाहम् आत्मानं राजानं मन्ये, केवलं प्रतिनिधिं मत्वा कर्माणि सम्पादये। अतः मम आसक्तिः विगता। भूयोऽहं भवताम् उपकारभरं शिरसा वहामि।

शुनः पुच्छम्



एकस्मिन् प्रदेशे एकः काष्ठहारकः आसीत्। स एकस्यां जीर्णकुट्यां निवसति स्म। वनात् इन्धनानि छित्त्वा विक्रीय च स्वप्राणयात्रां समाचरति स्म।

स प्रकृत्या अलसः अनुद्यमः च आसीत्। स सदा चिन्तयति स्म, यदि कश्चित् भूतः प्रेतो वा मम वशवर्ती स्यात्, स मम सर्वाणि अभीष्टानि सद्यः एव साधयेत्, अहं च नानाभोगान् भुञ्जानः विलासशय्यायां च शयानः संसारस्य सुखानि अनुभवेयम्।

तस्य कुट्या: अनतिदूरे एक: ऐन्द्रजालिक: बसति स्म। असौ काष्ठजीवी एकदा तम् उपगम्य अवदत्, अहं भवत: प्रतिवेशी अस्मि। मया श्रुतं यत् भूत–प्रेतादय: भवत: वशवर्तिन: सन्ति। भवान् तेषां सहायतया अचिरेण सर्वाणि अभीष्टानि साधयति। यदि भवत: अनुग्रह: स्यात्, ममापि कार्याणि निमेषमात्रेण भवितुम् अर्हन्ति। कृपया सेवाकर्मणि दक्षम् एकं भूतं मम वशवर्तिनं करोतु भवान्।

ऐन्द्रजालिक: उवाच–अहं तुभ्यं भूतं तु दास्यामि, किन्तु स कदापि अकर्मण्य: न तिष्ठति। यदि त्वं तं कार्ये न नियोजयिष्यसि, स त्वां खादिष्यति। काष्ठहारक: मुदितो भूत्वा अवदत्, अलं शङ्कया। अहं सर्वदा तं कार्येषु व्यस्तं करिष्यामि।

पुन: पुन: तस्यानुरोधात् दयमान: ऐन्द्रजालिक: तस्मै एकं भूतम् अयच्छत्। स तेन सह कुट्यां प्राप्त:।

कुटीम् उपेत्य भूत: अकथयत् स्वामिन् ! कार्यम् उच्यताम्। स्वामी आदिशत्, मम कुटीं प्रासादं कुरु। निमेषमात्रेण तस्य कुटी–प्रासादे परिणता जाता। तत: स तं वनानि छेत्तुम् आदिशत्। अल्पेन कालेन वनानि छिन्नानि अभवन्। तत्पश्चात् स नवीननगरनिर्माणाय तम् आदिष्टवान्।

नगरे निर्मिते जाते स काष्ठहारक: विश्वभ्रमणस्य कामनां प्राकटयत्। तेन भूतेन स विश्वभ्रमणं कारित:।

काष्ठहारकस्य सर्वम् ईप्सितं पूर्णं जातम्। पुन: कार्यं पृष्ट: स

किंकर्तव्यविमूढः सन् प्राणहानिभीतः ईश्वरम् अस्मरत्। तदा तस्य दृष्टिः समीपस्थे एकस्मिन् कुक्कुरे अपतत्।

स भूतम् आदिशत्, कुक्कुरस्य अस्य वक्रं पुच्छं सरलं कुरु। भूतः तत्क्षणं लाङ्गूलस्य सरलीकरणे प्रवृत्तो जातः, किन्तु साफल्यं न प्राप। भूतः श्रान्तो भूत्वा पराजयं स्वीचकार। किन्तु तत्स्वामी दृढतया अभाषत, आदिष्टं कर्म समाचर। स भूतः तदादेशं पालयन् अद्यापि वक्रं शुनः पुच्छं सरलीकर्तुं प्रयतते।

साम्ये यस्य स्थितं मनः



एकस्य श्रेष्ठिनः पार्श्वे विशाला सम्पत्तिः आसीत्। पर्याप्तानि सुखसाधनानि आसन्। तस्य गार्हस्थ्यजीवनम् अपि सुखमयम् अविद्यत किन्तु सत्यपि वैभवे तस्य चेतः अशान्तं व्याकुलं च आसीत्। कथम् एतत् ? स न जानाति स्म।

एकदा शान्तिकामनया स एकस्य साधोः कुटीम् उपगतः। असौ तस्मै साधवे स्वकीयं दुःखं न्यवेदयत्। साधुः उवाज—भद्र! श्रुतं मया सर्वम्। किन्तु भवतः समस्यायाः निदानं पाटलिपुत्रस्य उद्योगपतिः

धनदत्त: करिष्यति। भवता तत्रैव गन्तव्यम्।

साधुं प्रणम्य स श्रेष्ठी तस्मै नगराय प्रस्थित:। तत्र उपेत्य असौ धनदत्तस्य कार्यालयं गतवान्। उद्योगपते: तस्य विशाल: व्यापार विस्तार: आसीत्। स तदा अनेकै: व्यवसायिभि: परिवृत: तै: सह मन्त्रणां करोति स्म। तस्य वदनं कमलवत् प्रफुल्लितम् आसीत्। श्रेष्ठी अपि तं प्रणम्य आसन्दिकायाम् उपाविशत्।

अत्रान्तरे कश्चित् लिपिक: धनदत्तम् उपेत्य निवेदितवान्, श्रीमन्! दु:खदं समाचारं श्रावयामि। अस्माकं जलपोत: लक्षाधिकमूल्यवद्भि: पण्यवस्तुभि: साकं सागरे निमग्न:। तच्छ्रुत्वा सोऽवदत्, अलं चिन्तया। व्यापारे एतत् तु भवत्येव।

मुहुर्तानन्तरम् अन्य: लिपिक: उपस्थाय विज्ञापितवान् श्रेष्ठिन्। कार्पासमूल्यं वृद्धिं गतम्। लक्षश: रूप्यकाणां लाभ: भविष्यति।

धनदत्त: अब्रवीत्, किमत्र हर्षेण ? व्यापारे एतत् तु भवत्येव।

श्रेष्ठी सुखे दु:खे च तस्य मानसीं समतां प्रेक्ष्य प्रभावित: जात:। तेन ज्ञातं यत् शान्ति: वैभवे नास्ति। सा तु मनस: साम्ये निवसति। जगति स एव सुखी य: सम्पत्तौ विपत्तौ च साम्यं धारयति।

भोगा न भुक्ताः



भगवान् बुद्धः एकस्मिन् ग्रामे अवस्थितः आसीत्। तदा कश्चित् जनः तत्र आगत्य तम् अपृच्छत्, भगवन् ! विगतत्रिंशद्भ्यः वर्षेभ्यः भवतः सत्यस्य शान्तेः मोक्षस्य च उपदेशरानां कः प्रभावः अभवत् ! कियन्तः सन्ति ईदृशा जना, यैः मोक्षः अधिगतः ?

बुद्धः तस्य वचनम् अशृणोत् अवदत् च त्वं ग्रामं गत्वा लोकान् पृच्छ—कः सत्यम् इच्छति, कः शान्तिं कश्च मोक्षम् ? ईदृशानां

जनानां नामतालिकां विरच्य मय समीपे आगच्छ, तदा अहं तव प्रश्नस्य उत्तरं दास्यामि।

स जनः विस्मितः सन् उवाच, किमिदं विचित्रं कथितं भवता ! कः भवेत् ईदृशः जनः यः सत्यं शान्तिं मोक्षं वा न कामयेत ?

ततः भगवन्तं प्रणम्य असौ जनः सर्वं दिनं ग्रामे अभ्रमत् एकैकं जनं च अपृच्छत् त्वं किम् इच्छसि इति।

ग्रामवासिनाम् उत्तराणि आसन् – 'अहं सुखम् इच्छामि' 'अहं धनम् इच्छामि', 'अहं सन्ततिं कामये', 'मम रोगशमनं भवेत्', 'मम राजकीयसेवावृत्तिः स्यात्', मम भूसम्पत्तिः भवतु', 'मम सुन्दर्या कन्यया सह विवाहः स्यात् आदि। कस्यापि शान्तौ मोक्षे वा समीहा नासीत्।

स पुनः भगवन्तं बुद्धं समुपेत्य अभाषत–भगवन् ! विचित्रःअयं ग्रामः। कोऽपि शान्तिं मोक्षं वा न समीहते।

भगवान् उवाच, शृणु तावत्। यदि इच्छा एव नास्ति, प्राप्तिः कथं स्यात् ? यदि कस्यचित् पाटलिपुत्रदर्शनस्य समीहा नास्ति, स न गमिष्यति। एवं संसारे प्रायः सर्वे सुखम् इच्छन्ति, तस्य प्राप्तिं भोगेषु कामयन्ते। अतः शान्तिः न मिलति। यः शान्तिं कामयते, स सांसारिकेषु भोगेषु न रमते।

भगवतः वचनानि निशम्य तस्य शंकायाः समाधानं जातम्।

प्रथमं चौर्यम्



स्वतन्त्रभारतस्य प्रथमः प्रधानमन्त्री श्रीजवाहरलालनेहरूः आत्मकथायां स्वकुमारावस्थायाः एकां घटनाम् अलिखत् –

मम पिता श्री मोतीलालनेहरूः तदानीन्तनः अतिविख्यातः विधिवक्ता आसीत्। अहं प्रायः तं राजनैतिकेषु सामाजिकेषु अभियोग–

सम्बन्धिषु वा कार्येषु व्यापृतम् अपश्यम्। लेखनं तस्य जीवनस्य प्रमुखम् अङ्गम् आसीत्।


पितुः समीपे एका नयनाभिरामा लेखनी आसीत्। स प्रायः तया लेखन्या लिखति स्म। अहम् अपि तस्यै लेखन्यै अस्पृहयम्।

एकस्मिन् दिने पितृमहोदयस्य अनुपस्थितौ अहं तां लेखनीं स्वचौलकोषे अधारयम्।

गृहं प्रत्यावृत्तः जनकः यदा स्वीये अध्ययनकक्षे लेखनीं नापश्यत् तदा गृहपरिजनान् सेवकांश्च तद्विषये अपृच्छत्। सर्वे अनभिज्ञतां प्राकट्यन्। अहं मौनम् अतिष्ठम्। अन्ते स मम चौलकोषात् ताम् अलभत लेखनीचौर्यात् रूष्टः स माम् चपेटनाभः ताडितवान्।

विपुलैश्वर्यसम्पन्ने गृहे नासीत् कस्यचिद् वस्तुनः अभावः। मम समीपे शतशः रूप्यकाणि भवन्ति स्म। यदि पिता मया प्रार्थितः अभविष्यत्, तदा अहं तादृशीनां लेखनीनां स्वामी अभविष्यम्। एतत् मम बालसुलभचापल्यात् प्रथमम् अन्तिमं च चौर्यम् आसीत्।

समुत्साहः श्रियो मूलम्




कश्चित् नरपतिः शत्रुणा सह युध्यमानः पराजितः अभवत्। स राज्यात् पलाय्य वनम् अविशत् एकां गुहां च समाश्रयत्। तत्र वसतः तस्य कतिपयानि दिनानि गतानि। राज्यस्य पुनः प्राप्त्याशाऽपि नासीत्। स गतदिनानां सुखस्य वैभवस्य च स्मरणं कुर्वन् दुःखीयति स्म।

एकस्मिन् दिने स गुहाया एकां भित्तिम् आरोढुकामं एकं कीटम् अपश्यत्। स कीटः किंचित् उपरि गत्वा निपतति स्म। पंचदशवारं प्रयत्नं कृत्वा स भित्तेः उपरितनभागे गन्तुं सफलः जातः।

तस्य कीटस्य आदर्शं मनसि निधाय स नृपतिः गुहायाः बहिः गत्वा स्वसैनिकान् एकत्रितान् अकरोत्। पुनः पूर्णसमुत्साहेन आक्रम्य शत्रुं पराजितवान्।

सत्यं कथयन्ति विज्ञाः यद् यः विजयाशां न जहाति, स साफल्यं विन्दति।

आशा ज्योतिः



एका बालिका जन्मतः एव मूका बधिरा दृष्टिहीना च आसीत्। ईदृशस्य अपत्यस्य पित्रोः वेदनां कोऽपि सहृदयः अनुमातुं शक्नोति।

तस्याः पितरौ अपि तदीयदशया चिन्तितौ किंकर्तव्यविमूढौ च आस्ताम्। सा बालिका अपि यदा अवर्धत, तदा स्वां दशाम् अबोधत्। यतो हि सा भोजने, वस्त्रपरिवर्तने, गमनागमने सर्वथा

पराश्रिता आसीत्। कथं सा पराश्रयात् मुक्तिं विन्दतु कोऽपि न जानाति स्म।

तस्याः एका सखी तस्यै स्वावलम्बनस्य शिक्षादाने परं सहयोगं व्यदधात्। सा यदि जलं पातुं कामयते स्म, तस्याः सखी एकवारं जलं पाययति स्म। द्वितीयवारं याचिता सा स्वयं गत्वा जलं पातुं तां प्रैरयत्। एवं वस्त्रधारणे सखी सकृत् तस्याः सहयोगं वितेने। बहिर्गमने अपि एकबारं तस्याः मार्गदर्शनम् अकरोत्।

इत्थं क्रमशः सा बालिका पराबलम्बनं विहाय स्वयं कार्यसम्पादने रुचिं बभार। तस्याः आत्मविश्वासः प्रबुद्धः अभवत्, मनसि च किमपि अद्भुतं कर्तुं प्रेरणा समुद्भूता। अनेन उत्साहेन सम्भृता सा विद्याप्राप्तये तत्परा जाता। ततः सा किं किम् अकरोत्, सा उच्चशिक्षां प्राप्तवती, ग्रन्थान् लिखितवती, अनेकाः भाषाः शिक्षितवती, अनेकदेशानां यात्रां कृतवती। तया तादृशानि कर्माणि कृतानि यानि अक्षिमन्तः, श्रोत्रवन्तः, वाग्वीराः, अपि कर्तुं न पारयन्ति।

एकस्मिन् ग्रन्थे तया लिखितम् यत् निराशाया भावः मानवस्य सर्वां क्षमतां प्रेरणां च विनाशयति। ईदृशः मानवः अज्ञानस्य निर्धनताया च प्रतिरोधं कर्तुम् अक्षमः जायते। अतः सदा सर्वैः आशायाः ज्योतिः प्रज्वालनीयम्। अध्यवसायः, साहसं, कर्मचिकीर्षा च मानवं तत्र नयन्ति यत्र कल्पनायाः प्रसारोऽपि न भवति।

एषा बालिका आसीद् विश्वविदिता अमेरिकावास्तव्या हेलनकेलर।

सर्वे चौराः



पुरा एकस्मिन् राज्ये शासनव्यवस्था शोभना आसीत्। सर्वे सुखिनः समृद्धाः च आसन्। अपराधानां प्रायः अभावः एव आसीत्। धनचौरः प्राणदण्डं लभते स्म।

एकदा कश्चित् चौरः राजपुरुषैः निगृहीतः। तस्य अपराधः सिद्धः अभवत्। राज्यस्य नियमानुसारं राज्ञा तस्मै मृत्युदण्डः श्रावितः।

प्रत्यासन्ने प्राणदण्डसमये राजा चौरं तस्य अन्तिमाम् इच्छाम् अपृच्छत्। स राज्ञे निवेदितवान्, यदहं मौक्तिकानां कृषिं जानामि। अहम् इच्छामि यत् कश्चित् मत्तः इमां विद्यां शिक्षेत। अन्यथा मयि उपरते एषा अमूल्या विद्या अपि मया सह लोपं यास्यति।

राजा मौक्तिककृषिविद्याम् अवगन्तुम् औत्सुक्यं प्रादर्शयत्। तदा चौरः राज्ञा दत्तां भूमिं हलेन कृष्टवान्। कतिपयदिनानां परिश्रमेण भूम्यां कृष्टायां स मौक्तिकानि आनाययत्।

मौक्तिकवपनवेलायां राजा, तस्य सभासदः, कर्मचारिणः, उच्चाधिकारिणः, नगरस्य श्रेष्ठिनः, व्यापारिणः, अन्ये च प्रतिष्ठिताः पुरुषाः तत्र समाजग्मुः। यातायातमार्गाः विशेषरूपेण सज्जिताः आसन्। मन्त्रोच्चारपूर्वकं समारोहे आरब्धे चौरः राजानम् उवाच, राजन्! मौक्तिकवपनाय ईदृशम् कंचित् पुरुषम् आदिशतु भवान् येन जीवने कदापि चौर्यं न कृतं स्यात् न मनसा, न वाचा न कर्मणा।

राजा प्रधानमन्त्रिणम् अपश्यत्, किन्तु तस्य मुखम् अवनतं जातम्। क्रमशः तत्रोपस्थिताः सर्वे जनाः पृष्टाः, किन्तु तेषाम् मध्ये कश्चन अपि अग्रे उपस्थातुं साहसं न दर्शितवान्।

तदा चौरः राजानं प्रार्थयत, यत् अहं तु चौर्यवशात् एतत् पवित्रं वपनकर्म कर्तुं न अर्हामि। अस्माद् महतः जनसमवायात् अपि कश्चित् न आगच्छति। सम्प्रति पुण्यशीलः सदाचारव्रतः भवान् एव इदं पुण्यं कर्म सम्पादयतु।

नृपः संकोचं दर्शयन् अवदत् यन्मया बाल्ये वैद्येन अपथ्यसेवनात् निरुद्धेन अपि संगोप्य मिष्टान्नं खादितम् आसीत्।

तत् आकर्ण्य चौरः सविनयम् अवदत्, यदा सर्वे चौराः सन्ति, तदा केवलम् अहम् एव प्राणदण्डं कथं प्राप्नोमि ?।

तस्य तर्कं निशम्य मतिमत्तां च निरीक्ष्य राजा तम् अमुञ्चत् राजकार्ये च न्ययोजयत्।

मूल्याङ्कनम्



पुरा यूनानदेशे एका बृहती प्रदर्शनी आयोजिता अभवत्। तस्यां प्रदर्शन्याम् अपोलोदेवस्य अनुपमसौन्दर्यपूर्णा एका प्रतिमा प्रतिष्ठिता आसीत्। यूनानवासिनः अपोलोदेवम् ईश्वरं मन्यन्ते।

तां प्रदर्शनीं द्रष्टुम् महान् जनसम्मर्दः उपस्थितः अभवत्। यूनानदेशस्य नृपः स्वमहिष्या साकं प्रदर्शनीस्थलम् उपाययौ। स तत्र अपोलो–देवस्य अपूर्वसौन्दर्यमयीं प्रतिमां विलोक्य अपृच्छत्, कोऽस्या निर्माता? तत्र उपस्थिता जना उत्तरदाने असमर्था आसन्। राजा तस्याः

निर्मातुः परिचयप्राप्तये स्वकर्मचारिणः आदिशत्।

किंचित्कालानन्तरम् एकः राजपुरुषः कांचित् कन्यां निगृह्य आनीतवान् निवेदितवान् च, राजन् ! एषा कन्या निर्मातारं जानाति, किन्तु तस्य परिचयं न दत्ते।

राजा अपि मूर्तिनिर्मातृविषये कन्यकाम् अपृच्छत् किन्तु सा प्रत्युत्तरम् अदत्त्वा मौनम् अतिष्ठत्। भूयः पृष्टाऽपि यदा सा किमपि न उक्तवती, तदा स तस्यै कारादण्डं घोषितवान्।

तदैव कश्चित् तरुणः तत्र समागतः। स राज्ञः चरणयोः नतिं विधाय प्रार्थितवान्, यदियं मे स्वसा न दण्डनीया। अहम् अस्मि कृतापराधः। मया स्वहस्ताभ्यां निर्मिता प्रतिमा।

राजा अपृच्छत्, ब्रूहि, कस्त्वम् ? आत्मपरिचयं देहि। सोऽवदत्, अहं दासोऽस्मि।

तस्मिन् काले तत्र दासप्रथा प्रचलिता आसीत्। दासाः हेयदृष्ट्या वीक्ष्यन्ते स्म। एकस्य दासस्य ईदृशं दुःसाहसं यत् स देवस्य मूर्तिं निर्मातु इति उच्चैः क्रोशन् स जनसम्मर्दः तं तरुणं हन्तुम् अग्रे प्रासरत्, किन्तु राज्ञा निरुद्धः यतो हि स गुणज्ञः आसीत्। जनान् सम्बोधयन् स उवाच, किं न पश्यथ यूयं प्रतिमायाः अपूर्वं सौन्दर्यम्। पाषाणखण्डे एतादृशस्य सौन्दर्यस्य उद्भावयितुः हृदयं कीदृशं सुन्दरं स्यात् ? प्रतिमा स्वयं ब्रवीति यत् परमेश्वरस्य सृष्टौ सर्वे समानाः सन्ति।

इत्युक्त्वा स तं युवानं पुरस्कारेण सभाजितवान्।

सत्यभाषणम्



एकस्य कृषकस्य पुत्रः प्रकृत्या चपलः आसीत्। एकदा कृषकः पुत्राय एकं परशुं दत्तवान्। बालः परशुना क्रीडन् क्षेत्रं प्रति जगाम। तत्र रोपितान् सर्वान् क्षुपान् पादपान् च स स्वपरशुना अच्छिनत्। परिश्रमेण रोपितः चिराद् रक्षितः एकः फलवृक्षः अपि तेन परशुना निपातितः।

अन्येद्युः तत्पिता क्षेत्रं गत्वा तं फलवृक्षं, सर्वान् क्षुपान् पादपान् च छिन्नान् अपश्यत् एतद् वीक्ष्य स क्रुद्धः विषण्णः च सन् क्षेत्रस्य रक्षकान् आकारयत्। वृक्षच्छेदविषये पृष्टाः ते स्वीयाम् अनभिज्ञतां प्रकटयामासुः।

तदा पुत्रः तत्र आगत्य पितरम् अवदत्, पितृ महोदय ! परशोः तीक्ष्णतां परीक्षितुं मया एते पादपाः निपातिताः। पिताऽवदत्, त्वं न जानासि किं त्वया कृतम्। किन्तु अहं तव सत्यभषणेन प्रीतः अस्मि। पुनः एवं न विधेयम्।

स बालकः वयस्कः भूत्वा अमेरिकादेशस्य राष्ट्रपतिपदम् अलंकृतवान्। तस्य नाम आसीत् वाशिंगटनः।

व्यसन परवत्ता



एक: मद्यव्यसनी जन: प्रतिदिनं सायंकाले मद्यं सेवते स्म। तस्य पत्नी पुत्रा: पुत्र्यश्च तस्य एतेन व्यसनेन दु:खिता आसन्। सर्वं दिनं परिश्रमं कृत्वा यद् अर्जयति स्म, तत् अनेन दुर्व्यसनेन नाशयति स्म।

एकस्यां रात्रौ स काचदीपिकाम् आदाय मदिरालयं गत:। स तत्र आतृप्ति मद्यम् असेवत। हतचेतन: स्खलद्गति: च असौ स्वकाचदीपिकाम् आदाय गृहं प्रति प्रतस्थे। मार्गे एकस्मिन् स्थाने प्रकाशाभावात् घनतिमिरम् आसीत्। स काचदीपिकया मार्गं द्रष्टुं अयतत किन्तु सफल: न अभवत्। अतिकृच्छ्रेण गृहं प्राप्य स मद्यपायी अशेत।

प्रात: प्रबुद्ध: स काचदीपिकाम् आदाय आगच्छन्तं मदिरालयस्य सेवकम् अपश्यत्। मम काचदीपिका अस्य हस्ते कथम् आगता इति विचारयति तस्मिन् सेवक: अब्रवीत्, महाशय ! रात्रौ त्वया मदिरालये काचदीपिकास्थाने शुकपंजर: आनीत:। गृह्यतां स्वकाचदीपिका, दीयतां च अस्माकं शुकपंजर:।

प्रेमबन्धनम्



पुरा कोशलदेशे एकः भीषणः दस्युः अवसत्। तस्य नाम अङ्गुलिमाल इति आसीत्। लोकानां लुण्ठनं हननं च तस्य दैनिकं कृत्यम्। असौ यान् हन्ति स्म, तेषाम् अङ्गुलीः छित्त्वा ताभिः मालां विरच्य कण्ठे अधारयत्, अतः तस्य अङ्गुलिमाल इति ख्यातिः जाता।

तेषु दिनेषु कोशलदेशे प्रसेनजितस्य शासनम् आसीत्। अङ्गुलिमालस्य कृत्यैः दुःखितां प्रजां त्रातुं तेन कृताः यत्नाः फलवन्तः न आसन्। तस्य निग्रहणे कृतः सैन्यबलप्रयोगः अपि अकिञ्चित्करः जातः।

तदानीं कोशलदेशे भगवन्तं बुद्धं समागतं ज्ञात्वा प्रसेनजितः तस्य दर्शनार्थं गतवान्। तथागतः तं विषण्णवदनं विलोक्य अपृच्छत्, राजन्! कथं भवान् चिन्ताकुलः लक्ष्यते ?

राजा तस्मै अङ्गुलिमालस्य विषये सर्वं न्यवेदयत् अवदत् च, यदहं तं निग्रहीतुं दिवानिशं यत्नपरोऽस्मि।

भगवान् बुद्धः सस्मितं न्यगादीत्, यत् भवदीयैः बलप्रयोगैः अद्यावधि नासौ निगृहीतः, किन्तु यदि स धर्मपरायणः भूत्वा भवतः समक्षम् आयाति, तदा किं करिष्यति भवान् ?

प्रसेनजितः अवादीत्, अहं तस्य अभिनन्दनं करिष्यामि तं रक्षिष्यामि च। तदा भगवान् बुद्धः समीपस्थम् एकं काषायधारिणं पुरुषं राज्ञः समक्षे अकरोत् अवदत् च, एषेऽस्ति भवतः अपराधी। अङ्गुलिमालं विलोक्य राजा चकम्पे, किन्तु भगवान् बुद्धः तम् आश्वासयन् उवाच—राजन् ! मा भैषीः। सम्प्रति एष प्रेमबन्धनेन बद्धः नापचरिष्यति। अधुना अस्य नवं जन्म जातम्। यत्कार्यं बलप्रयोगेण न सिध्यति तत् प्रेम्णा कारुण्येन च अनायासं सम्पद्यते।

प्रसेनजितः प्रेम्णा अङ्गुलिमालस्य अभिनन्दनं चक्रे, सोऽपि विनम्र—

भावेन राजानं प्रणम्य अवदत् राजन् ! अहम् आत्मनः दुष्कृत्यानां कृते भृशम् अनुतपामि। क्षम्यन्तां मदीयाः अपराधाः। भगवतः तथागतस्य अनुकम्पयैव अहं दुश्चरितानि परिहाय साधनापथे प्रवृत्तोऽस्मि।

राजा उभौ अभिवाद्य मुदितमनाः स्वराजभवनं प्रति प्रतस्थे।

पथ्यं हितं रुजार्तानाम्



पुरा एकस्मिन् नगरे कश्चित् श्रेष्ठी वसति स्म। स जिह्वालोलुप: आसीत्। सदा घृतपक्वानि अम्लानि खाद्यानि च खादति स्म। अम्लं दधि तस्यै बहु अरोचत।

एकदा स कासेन पीडित: जात:। वैद्यात् औषधम् अगृह्णात् किन्तु कासनिवृत्ति: न अभवत्। कासस्य शमनं कथं भवेत् इति पृष्ट: वैद्य: अवदत्, यत् मया औषधसेवनेन सह पथ्यसेवनं कथितम् आसीत्। अम्लवस्तूनां सेवनं तावत् परिवर्जनीयं, यावत् कास: न शाम्यति। किं भवता ममादेश: अनुसृत:।

श्रेष्ठी प्रत्युवाच – वैद्यराज! अहं दधि त्यक्तुं न शक्नोमि। यदि अन्यत् किंचित् पथ्यं स्यात्, तत् पालयिष्यामि। रुष्टः वैद्यः तस्मै औषधं न दत्तवान्।

अन्यस्माद् वैद्याद् आनीतः अगदः अपि लाभकरः न असिध्यत्। एवम् अनेकेभ्यः वैद्येभ्यः गृहीतम् औषधं तस्य रोगशान्तये न अकल्पत।

ततः निराशीभूय स श्रेष्ठी एकं वृद्धं वैद्यराजम् उपगम्य कासशमनाय किमपि बहुमूल्यम् औषधं दातुं तं प्रार्थयत अवदत् च, अहं दधिसेवनात् न वर्जनीयः।

वैद्यः उवाच, श्रेष्ठिन्! वैद्यके शास्त्रे दध्नः अनेके गुणाः कथिताः सन्ति। अतः अहं भवन्तं तस्मात् न निवारयामि। श्रूयतां तावत् तस्य प्रथमगुणः – दधिसेविनः गृहे चौराः न प्रविशन्ति। द्वितीयः गुणः – दधिसेविनम् कुक्कुरः न दशति। तृतीयः गुणः दधिसेविनां केशाः श्वेता न भवन्ति।

एतत् आकर्ण्य श्रेष्ठी अतीव मुदितः भूत्वा वैद्यराजं पप्रच्छ, अहं भवतः कथनस्य विशेषविवरणं ज्ञातुम् ईहे। वैद्यराजः विहस्य अब्रवीत् श्रेष्ठिवर! श्रूयताम्। केवलम् औषधसेवनेन रोगः न शाम्यति। तत्र पथ्यसेवनम् आवश्यकम्। दधिसेवी जनः कासात् मुक्तिं न लभते। स सदा कासति। दिवा अपि, नक्तम् अपि। अतः चौरा गृहे न विशन्ति।

कासयुक्तःजनः अनुदिनं कृशतां याति। कार्श्यात् स लगुडेन चलति। लगुडवन्तं कुक्कुराः न दशन्ति।

कासरोगी वार्धक्यात् पूर्वम् एव दिवं प्रयाति अतः तस्य केशा धवलाः एव न भवन्ति।

वैद्यराजस्य साभिप्रायं हितं वचनं श्रुत्वा श्रेष्ठी निश्चयम् अकरोत् यत् सः अपथ्यवस्तूनि परिहाय स्वास्थ्यलाभं करिष्यति।

प्रहरि-चतुष्टयम्



एकस्य राज्ञः राज्यम् अतिविशालम् आसीत्। राज्ये व्यवसायाः अनेके उद्योगाः च आसन्। शिक्षितानां बाहुल्यम् आसीत्। उपद्रवाः कलहाश्च नैव भवन्ति स्म। प्रजा सुखिनी आसीत्।

तस्य राज्यस्य समीपवर्ति एकं लघु राज्यम् अविद्यत। तत्र अशान्ति–अराजकता–उपद्रव--कलहानाम् एव वातावरणम् आसीत्। तस्य शासकः राज्ये व्याप्तस्य असन्तोषस्य अपोहने अक्षमः अभवत्। तस्य प्रजा नानाविपत्सु पतिता असीदत्।

एकदा स राजा बृहद्राज्यस्य नृपतेः समीपम् अगच्छत्। वार्ताप्रसंगे स निजराज्यस्य समस्यानां वर्णनं कृत्वा अपृच्छत्– यद् भवान् कथम् अस्य विशालराज्यस्य शासनं करोति। सर्वत्र शान्तिः विराजते। क्वचित् कलहाः न सन्ति। सुखस्य समृद्धेः च प्रसारः दृग्गोचरीभवति। किमत्र कारणम्?

स राजा विहस्य अब्रवीत्, मम राज्ये चत्वारः प्रहरिणः सन्ति, ये दिवानिशं मम रक्षां कुर्वन्ति।

एतत् निशम्य लघुराज्यस्य शासकः अवादीत्, किं विशाले अस्मिन् राज्ये केवलं चत्वारः एव प्रहरिणः। मामके राज्ये तु सहस्रशः सन्ति तथापि शोचनीयाऽस्ति दशा। कृपया स्वाभिप्रायं प्रकाशयतु।

राजाऽवदत्, तर्हि श्रूयतां, सत्यं मम प्रथमः प्रहरी। स माम् असत्यात् रक्षति।

द्वितीयस्य प्रहरिणः अभिधानं प्रेम इति। स प्रहरी माम् घृणायाः अवति। तृतीयस्य नामधेयं न्यायः, स अन्यायाद् मम रक्षां विधत्ते। तुरीयः प्रहरी त्यागः, स स्वार्थाद् रक्षणं विदधाति। एतेषु चतुर्षु प्रहरिषु सत्सु नाहं चिन्तां कुर्वे। राज्ञः शंकायाः समाधानं जातम्। यत्रापि एते प्रहरिणः भवन्ति तत्र शान्तेः, सुखस्य समृद्धीनां च राज्यं वरीवर्ति।

मैत्र्याः आदर्शः



एकस्मिन् राज्ये द्वे घनिष्ठमित्रे अवसताम्। तस्य राज्यस्य शासकः अत्याचारपरः क्रूरश्च आसीत्। प्रजायाः कष्टानि असहमानौ तौ सुहृदौ नृपस्य विरोधं कर्तुं प्रवृत्तौ। प्रजायां विद्रोहभावनाया जागरणप्रयासे तयोः एकः राजपुरुषैः धृतः। राज्ञा तस्मै मृत्युदण्डः श्रावितः।

मृत्युदण्डं श्रुत्वा स राज्ञे न्यवेदयत् यदहं मरणात् पूर्वं निजे ग्रामे परिवारं द्रष्टुम् इच्छामि। राजा गमनाय नान्वमन्यत तदा तत्रोपस्थितः

तस्य सुहृद् अवदत्, अयं मम सखा गृहे प्रेष्यताम् तत्स्थाने अहं शूलम् आरोपणीयः, यदि एषः निश्चिते अवधौ न आगच्छति।

नृपतिः तस्य प्रार्थनां स्वीचकार किन्तु षड्होरामिते काले तेन आगन्तव्यम्, इति पणोऽपि श्रावितः। अन्यथा तस्य सुहृत् प्राणदण्डं लप्स्यते।

अश्वम् आरुह्य दण्डनीयः पुरुषः जवेन गृहं प्राप्तः। परिवारेण सह संभाष्य तं च रुदन्तं विहाय स पुनः शीघ्रं तत्र प्राप्तुम् ऐच्छत् किन्तु मार्गे अश्वः अपतत् अम्रियत च।

अन्यवाहनेन यदा स तत्र प्राप्तः, षड्होराः व्यतीताः आसन्। तस्य सुहृद् वधस्थानं प्रति नीयते स्म, किन्तु स प्रसन्नः आसीत् यदहं मित्रस्य प्राणरक्षणे सहायः भवामि।

विलम्बात् प्राप्तः तस्य सुहृद् नृपाय न्यवेदयत्, यदहं प्राप्तोऽस्मि। अहम् एव अपराधी, अतः अहम् एव शूले आरोपणीयः। मम सुहृद् मुच्यताम् किन्तु तस्य मित्रस्य तर्कः आसीत्, षड्होराः व्यतीताः, अतः नियमानुसारं मृत्युदण्डभाक् अहम् अस्मि।

तयोः मित्रयोः ईदृशं भावं वीक्ष्य भूपतिः करुणार्द्रः अजायत। स उभौ सुहृदौ अमुंचत्। तदाप्रभृति स प्रजाजनेषु अत्याचारपरं व्यवहारं परित्यज्य प्रजारञ्जने प्रवृत्तः जातः।

युक्तियुक्तं समाधानम्



एकदा सम्राजः अकबरस्य राजप्रासादे तस्य नवरत्नानि उपस्थितानि आसन्। अकबरः यदा अपि समयं लभते स्म, स तेषां विदुषां समक्षे कांचित् समस्यां प्रश्नान् वा उपस्थापयति स्म। ते अपि यथामति समाधानम् अकुर्वन्। नवरत्नेषु वीरबलस्य उत्तराणि सर्वैः अभिनन्धन्ते स्म।

तस्मिन् विदुषां समवाये अकबरः प्रश्नान् अपृच्छत् — कस्य पादपस्य पुष्पम् उत्तमम्। दुग्धं कस्य श्रेष्ठम्? माधुर्यं कस्य प्रशस्यम्? कतमं पत्रम् वरम्? राजसु कः श्लाघ्यः?

तेषां सभापण्डितानां मध्ये कश्चित् पुष्पेषु पाटलं, कश्चित् कमलं श्रेष्ठम् अवदत्। केनचित् गोदुग्धं प्रशंसितम्, केनचिद् अजादुग्धम्। कश्चित् दक्षुदण्डस्य, कश्चन मधुन: माधुर्यं प्रशशंस। पत्रेषु केनचित् कदलीदलं केनचित् निम्बतरो: दलं श्रेष्ठम् अभाणि। उत्तमस्य राज्ञ: नाम—निर्देशने अपि ते भिन्नमतय: आसन्। कश्चित् अकबरम् एव राजसु मूर्धन्यम् अवादीत्।

अकबर: सर्वेषाम् उत्तराणि श्रुतवान्। बीरबलं मौनम् आस्थितं दृष्ट्वा स तमपि स्वमतं प्रकटयितुम् अवोचत्—

बीरबल: प्रोवाच, राजन्! पुष्पं तु कार्पासस्य श्रेष्ठम् यत: तेन वस्त्राणि निर्मितानि भवन्ति। निर्धना अपि तै: वस्त्रै: शरीरम् आच्छादयितुं शक्नुवन्ति। दुग्धं मातु: एव प्रशस्यम्। तेन समानं शिशो: पोषकं किञ्चित् नास्ति। माधुर्यं रसनाया: श्लाध्यं यत् परान् अपि वशीकरोति। दलं ताम्बूलस्य प्रशंसनीयं भवति। तत् यदि अरये अर्प्यते, सोऽपि मित्रतां याति। ताम्बूलदानेन जन: निष्ठया कर्म सम्पादयति। राजसु इन्द्र: एव वरिष्ठ: यस्य कृपया भूमौ सुधावृष्टि: भवति। सर्वै: बीरबलस्य उत्तराणि अभिनन्दितानि। सम्राट् अकबरशाह: पौन: पुन्येन तम् प्राशंसत्।

मा मम चित्रं कार्षीः



कस्मिंश्चित् पुरे एकः चित्रकारः अवसत्। तस्य चित्राणि दृश्यं संमूर्तयन्ति स्म। अतः उत्कृष्टचित्रकारेषु तस्य गणना आसीत्। एकदा तस्य मनसि विचारः प्रास्फुरत् यत् अहं मुग्धाननस्य देवतुलितसौन्दर्यस्य कस्यचित् बालकस्य चित्रं रचयेयम्। असौ स्वयात्रासु ईदृशं कमनीयकान्तिं बालं यत्र तत्र गवेषते स्म।

बहुकालानन्तरम् अतिमुग्धाकृतिः अनुपमलावण्यसम्पन्नः कश्चित्

कृषकबालकः तेन ग्रामे प्राप्तः तस्य पित्रोः अनुमत्या स बालकं समक्षे उपवेश्य कैश्चिद् दिनैः तस्य प्रतिकृतिं पूर्णताम् अनयत्।

अपूर्वकान्त्या राजमानं तत् चित्रम् सर्वैः अभिनन्दितम्। तस्य चित्रस्य लक्षशः प्रतयः तेन विक्रीताः बहुधनं च समर्जितम्।

बहूनि वर्षाणि व्यतीतानि। पुनः तस्य चेतसि विचारः प्रादुरासीत् यत् कस्यचित् क्रूरकर्मणः भयङ्कराकृतेः मानवस्य चित्रं रचयेयम्, यद् दृष्ट्वा भीतेः जुगुप्सायाः च भावः उत्पद्येत।

ईदृशं मानवं यत्र तत्र अन्विष्यन् स एकं कारागृहं गतः। तत्र अधीक्षकस्य अनुमत्या स तादृशं दण्डभाजम् एकं बन्दिनम् दृष्टवान्। चित्रकारस्य कल्पनायां यादृशः मानवः अविद्यत, स तादृशः एव आसीत्।

चित्रकारः तम् उपेत्य स्वाभिप्रायं निजगाद। किं स्यात् मम चित्रेण इति पृष्टः स तस्य शङ्काम् अपनेतुं चित्राणां महत्त्वं प्रत्यपादयत्। पूर्वरचितं बालकचित्रम् अपि प्रादर्शयत्।

तत् चित्रं ध्यानेन अवलोकयन् स बन्दी क्षणं मौनं भेजे। ततः तस्य नेत्राभ्याम् अश्रुधारा प्रावहत्। चित्रकारः तं रुदन्तं वीक्ष्य अपृच्छत्। किं जानासि त्वम् एतं बालकम्।

दीर्घं निःश्वसन् असौ बन्दी शनैः जगाद – महाशय! एतत् ममैव शैशवकालस्य चित्रम्।


तत्कथनं संश्रुत्य स्तब्धः विस्मितः च चित्रकारः अभाषत, क्वायं सुकुमारः कुमारः क्व च घोराकृतिः त्वम्। किमिदम्? स्पष्टम् उदीरय।

क्षणं विरम्य प्रकृतिस्थः भूत्वा स आत्मवृत्तम् एवम् कथयामास, यत् बाल्ये एव मम पितरौ दिवं गतौ। ग्रामे एकलः निवसन् गहं दुर्जनानां सङ्गम् अविन्दम्। तत्प्रभावाद् अनेके दोषा माम् आविशन्।

पश्चाद् दस्यूनां सङ्गेन चौर्यं लुण्ठनं हिंसनं च मे वृत्तिः संजाता। यादृशं कर्म, तादृशम् एव क्रौर्यं मम आनने संक्रान्तम्। एकदा राजपुरुषैः निगृहीतः दण्डितश्च कारां प्राप्तवान्।

असौ दस्युः पुनः करौ बद्ध्वा तं प्रार्थयत यत् मम चित्रं नैव नैव रचनीयम्।

अत्यासङ्गो हि दुःखाय



एकस्य भूपतेः नवीनासु वेषभूषासु महती प्रीतिः आसीत्। राजकार्यम् अपि तस्मै न रोचते स्म। स सर्वदा इतो वा ततो वा बहुमूल्यानि वस्त्राणि आनाययति स्म। सौचिका अनारतम् अधुनातनानि वस्त्राणि नवीनशैल्या विभूष्य तम् उपहरन्ति स्म। वस्त्राणाम् एव चर्चा तस्य प्रिया आसीत् तद्वसनानां प्रशंसकाः तस्य कृपापात्राणि आसन्।

एकदा समीपवर्तिनः राज्यस्य द्वाभ्यां धूर्ताभ्यां तस्य वासः—प्रेम्णः चर्चा श्रुता। 'भूपतिः अयं वंचनीयः' इत्यवधार्य ताभ्यां राज्ञे पत्रं लिखितं, यद् आवां वस्त्रविभूषायां विशेषण निपुणौ स्वः। स्वर्ण—रत्नादिसूत्रैः वस्त्रवयने आवाम् असाधारणौ। अस्मन्निर्मित वस्त्राणाम् एका विशिष्टता

अवधानम् अर्हति, यत् तानि अयोग्यैः पदासीनैः नरैः मूर्खैश्च द्रष्टुम् अपि न शक्यन्ते।

पत्रं प्राप्य नृपः अतितरां मुदितो जातः। स सम्मानपुरस्सरं तौ निमन्त्रितवान्। प्रासादस्यैकभागे तयोः अवस्थानस्य आतिथ्यस्य च विशेषं प्रबन्धम् अकारयत्, वस्त्र–निर्माणाय पुष्कलं सुवर्णं, रत्नानि, उत्तमानि वयनयन्त्राणि च ताभ्यां प्रादात्।

तौ वञ्चकौ सर्वम् एतत् सौविध्यं प्राप्य नन्दितौ अभवताम्। तयोः योजनानुसारं वयनकर्म तु नैव आसीत्। केवलं प्रदर्शननिमित्तं तौ वयनयन्त्राणां समन्तात् चङ्क्रमणं कुरुतः स्म।

एकेन पक्षेण कियत् कार्यं सम्पन्नम् इति ज्ञातुम् उत्सुकेन नृपेणैकः मन्त्री प्रेषितः। तत्र गत्वा मन्त्री किं पश्यति– एकः शून्यः विशालकक्षः, तत्र वयनयन्त्राणि, द्वौ कर्मविरतौ कर्मकरौ च। एतत् अवलोक्य मन्त्री विचारम् अकरोत्, यद्यहं नृपाय सर्वं सत्यं सत्यं वदामि, स मां मूर्खम् अयोग्यं च मत्वा कोपिष्यति। तत् किं करोमि? किंचिन्मनसि निश्चित्य स राजानम् उपेत्य अवोचत्, राजन्! तानि तु दिव्यानि वस्त्राणि – अदृष्टपूर्वाणि अश्रुतपूर्वाणि च।

वस्त्राणां श्लाघाम् आकर्ण्य राज्ञः हर्षः हृदये न माति स्म। सप्ताहाद् अनन्तरं स स्वयं तत्र गतः, किन्तु किञ्चित् न अवालोकत। तदैव असौ तयोः कथनम् अस्मरत् यत् दिव्यानि वस्त्राणि मूर्खस्य दृष्टिपथं न यान्ति। यदि अहं वस्त्राणां प्रशंसां न करोमि, तदा मूर्खो भवामि।

अतः स तयोः अग्रे दिव्यानां वाससां सुन्दरताम् उपवर्ण्य तेषां धारणस्य तिथिं निश्चितवान्। निश्चिते दिने तौ वञ्चकौ 'वस्त्राणि' आदाय राजसभायां समागतौ राजानम् ऊचतुश्च – सम्प्रति भवान् धृतपूर्वाणि वस्त्राणि अवतार्य दिव्यानि वस्त्राणि प्रतिमुञ्चतु।

नृपः संकोचेन सभायां वस्त्राणि अवतार्य सर्वथा नग्नः जातः। तदा तौ केवलं हस्तयोः चेष्टाभिः भूपतिं 'दिव्यवस्त्रधारिणं' चक्रतुः। स्वमूर्खपदवाच्यतां परिहरन्तः सभासदस्याः 'वस्त्राणां' दिव्यतां कमनीयतां च उपावर्णयन्।

मुहूर्तं तत्र स्थित्वा 'दिव्याम्बरधरः' भूपालः राजभवनं प्रविष्टः। अनावृतदेहं तं विलोक्य दास्यः महिष्यश्च लज्जया स्व स्वभवनानि अविशन्। ताः पलायमानाः विलोक्य भूपः विचारितवान् – नूनम् एताः मूर्खाः सन्ति, अतएव दिव्यानि वस्त्राणि न विलोकयन्ति।

तदा तस्य पट्टमहिषी राजानम् उपेत्य निवेदितवती – मन्ये, भवतः एतानि दिव्यानि वस्त्राणि अति मनोरमाणि सन्ति। किन्तु ममापि एकोऽनुरोधः भवता पालनीयः। स चायं, वयं मानवाः स्म, न तु देवलोकवासिनः, अतः सर्वं दिव्यं माऽस्तु। एकं धौतवस्त्रं तु स्वदेशीयम् अपि भवतु। स्वदेशस्य गरिमा भवता एव रक्षणीयः। इत्युक्त्वा सा प्रसभं तमेकं धौतवस्त्रं परिधापितवती।

अभ्यासः किं न साधयेत्



कांगडाप्रदेशान्तर्गते एकस्मिन् आवसथे एका संस्कृतपाठशाला अवर्तत। तस्यां शालायाम् अध्यापयमाना गुरुजना न्याय–वेदान्त–मीमांसा–व्याकरणादिशास्त्राणां पारदृश्वानः आसन्। तेऽतिसमुत्साहेन छात्रगणं नैकविषयान् अध्यापयन्ति स्म।

तत्रत्यां ख्यातिं निशम्य अन्येभ्योऽपि प्रदेशेभ्यः ज्ञानपिपासवः तत्रागत्य प्रवेशम् अलभन्त। एवं तत्र छात्राणां संख्या दिनानुदिनम् उपचीयमानाऽऽसीत्। समीपस्थनगरनिवासिनो धनिश्रेष्ठाः पुष्कलेन धनेन,

अन्नप्रदानेन पुस्तकवसनादिवितरणेन पाठशालाया: सुचारुव्यवस्थां स्वकर्तव्यं मन्यन्ते स्म।

एकदा रामनाथो नाम कश्चिद् बाल: कस्माच्चित् प्रदेशात् तत्रागत:। प्रवेशम् आप्त्वा स पठने निरतोऽभवत् किन्तु मन्दबुद्धितयाऽसौ गुरुजनोदितं सम्यग् अवबोद्धुं न शशाक। कतिपयैरेव अहोभि: तस्य पठनेऽरुचिर्जाता।

एकदा क्वचित् तेन पठितं यत् मन्त्रजपात् विद्याप्राप्ति: भवति। एतेन समुत्साहितोऽसौ सरित्तीरं प्राप्य मन्त्र जपे निरतोऽभवत् ।

इत्थं जपं कुर्वत: तस्य कतिपयानि अहानि यातानि। तस्मिन् नदीतीरे एक: स्थविर: विप्रोऽपि प्रतिदिनम् आगत्य स्नानान्ते सन्ध यामुपास्ते स्म। स औत्सुक्येन अल्पवयसं बालं मन्त्रजपे सक्तं निरीक्ष्य एकदा पृष्टवान् भो बाल् ! कथम् अस्मिन् मन्त्रजपे तेऽभिनिवेश:? किं प्रयोजनोऽयं तेऽबाल आयास: ? तव तु पठनाभ्यासकाल एष:। केन कारणविशेषेण मन्त्रजपे ते प्रवृत्तिर्जाता? नि:संकोचम् उच्यताम्।


बाल: तं वृद्धम् अभिवाद्य सविनयम् उवाच! अहं विद्याप्राप्त्यर्थे मन्त्रं जपामि। तद्वचनम् आकर्ण्य वृद्ध: अनुक्त्वा किंचित् तत्पार्श्वे उपाविशत्। तत: स वालुकामुष्टिं तीव्ररये जलप्रवाहे क्षेप्तुम् आरेभे। पौन:पुन्येन एवं कुर्वाणं तम् अवलोक्य बाल: अपृच्छत् भवान् किमेतत् करोति?

वृद्ध उवाच, अहं बालुकया सेतुं निर्माय परं पारं गन्तुमीहे। बालो विहस्यावदत्, अनर्थक: प्रयास एष:। यतो बालुकां तु जल–

प्रवाहः सहैव नयति। कथं सेतुनिर्माणं भवितुमर्हति?

विप्रः सहासं बभाषे, वत्स। ममेव तव प्रयासोऽपि अपार्थः। विद्या अभ्यासेन सिध्यति न तु मन्त्रजपेन। तद् गच्छ शालाम्। पुनः उद्योगमाचर, अभ्यासं च विधेहि। चिरेण वाऽचिरेण वा त्वं विद्यावान् भविष्यसि। बालः तदभिप्रायां अवेत्य तं प्रणनाम, अध्ययने च प्रावर्तत।

कष्टं सर्वप्रसादनम्



कश्चित् जनः गर्दभेण सुदूरप्रदेशस्य यात्रायै प्रस्थितः। तेन सह तस्य द्वादशवर्षीयः पुत्रः अपि आसीत्। जनकः गर्दभम् आरुह्य पुत्रश्च पदातिः प्रयाति स्म।

पथि द्वित्राः जनाः गर्दभस्थं तं वीक्ष्य ऊचुः, कीदृशोऽयं पिता, यः स्वयं तु सगर्वं गर्दभारूढः, किन्तु वराकः बालकः पदातिः याति।

तेषां टिप्पणीं श्रुत्वा पिता गर्दभात् अवरुह्य पुत्रं गर्दभे उपावेशयत्। यावत् तौ किञ्चिद् दूरं गच्छतः, अन्ये केचित् जनाः बालकम् आक्षिपन्तः

अवोचन्! कीदृशोऽयं निर्लज्जः बालः, एष स्वयं तु गर्दभासीनः प्रयाति, वृद्धः पिता पद्भ्यां तम् अनुगच्छति। नूनम् एष कलिकालस्य प्रभावः।

तेषां कुत्सनं निशम्य पिताऽपि पुत्रेण साकं रासभम् अध्यतिष्ठत्। मार्गे अन्ये केचित् सह यायिनः उभौ विलोक्य अवदन्—एतौ पितापुत्रौ कीदृशौ निष्ठुरौ स्तः, ययोः हृदये मूकं निरीहं च पशुं प्रति दया एव नास्ति। नूनम् उभयोः भारेण गर्दभोऽयं मरिष्यति। अस्माभिः तु यद् युक्तरूपं प्रतिभाति, तत् कथितम्। यद् रोचते तत् क्रियताम्।

तद्वचनेन लज्जमानौ इव उभौ गर्दभाद् अवतीर्य पदाती प्राचलताम्।

कञ्चिद् अध्वानं लङ्घितवतोः तयोः वर्त्मनि कतिपये जनाः तौ दृष्ट्वा उच्चैः हसन्तः अभाषन्त—पश्यत, पश्यत इमौ मूर्खौ। गर्दभे याने सत्यपि यद् पद्भ्यां यातः।

सत्यम् उच्यते मनीषिभिः यत् सर्वेषां प्रसादनं सुकरं नास्ति।

नास्ति लोभसमो व्याधिः



एकस्मिन् वनप्रदेशे चत्वारः दस्यवः वसन्ति स्म। ते यदा कदा अवसरं दृष्ट्वा नगरेषु ग्रामेषु वा आक्रम्य लोकान् लुण्ठन्ति स्म। तत्रत्या जनता तेषाम् आतंकसंत्रस्ता किमपि कर्तुं न अपारयत्।

एकदा वाणिज्याय गच्छतः जनान् लुण्ठित्वा तैः भूरि वित्तं सुवर्णं च अधिगतम् तत् सर्वम् आदाय ते वनं प्रविश्य रात्रिं नीतवन्तः। प्रभाते समुत्थाय यदा ते चतुर्षु भागेषु धनविभजनस्य योजनां तन्वन्ति स्म, तदा तेषु एकः प्राह,भोः। एतत् कार्यं तु पश्चादपि भविष्यति।

प्रथमं क्षुधाशमनोपायः चिन्तनीयः।

एतत् निशम्य सर्वैः तन्मतम् अभिनन्दितम्। तत्क्षणमेव तेष्वेकः दस्युः भोजनम् आनेतुं समीपस्थनगरभोजनशालां प्रेषितः।

अथ त्रिभिर्दस्युभिः चिन्तितं यत् अस्माकं चतुर्थः चेद् हन्येत, तदा त्रिभिः अस्माभिः भूरितरं घनं प्राप्येत।

तदैव भोजनस्य आनयनाय गतस्य चतुर्थस्य लुण्ठकस्य मनसि विचारस्फुरणं जातं, कथं नाहम् एकाकी सर्वस्य विभवस्य अधिपतिः स्याम् इति।

इत्येवं विचार्य स तत्र भोजनालये भोजनं कृत्वा त्रयाणां भोजनसामग्र्यां विषं मिश्रयित्वा प्रत्यागतः।

अथ त्रयः ते दस्यवः शस्त्रेण चतुर्थं जघ्नुः। पश्चात् निश्चिन्ताः भूत्वा भोजनं कर्तुम् उपचक्रमिरे।

भोजनान्ते तेषां देहे वेदना समुद्भूता। रसना शुष्कतां गता। अक्षिणी प्रस्फुटिते अभवताम्। अचिरात् मोहम् उपगताः ते त्रयोऽपि दस्यवः पंचत्वम् अवापुः।

लोभवशंगतानाम् भवत्येव ईदृशी तादृशी वा दशा।

मिथ्याभिमानः



छत्रपतिः महाराजशिववीरः एकदा दुर्गस्य निर्माणं कारयति स्म। सहस्रशः कर्मकराः श्रमिकाश्च तस्मिन् निर्माणकर्मणि व्यापृताः आसन्। महाराजः स्वयमपि तस्य महतः कार्यस्य अवेक्षणाय आयाति स्म। विविधकार्यव्यापारेषु रतानां कर्मकराणां भूयसीं संख्यां विलोक्य तन्मनसि सुगुप्तम् अभिमानाङ्कुरः प्रवेशम् अलभत यत् मया सर्वेषाम् एतेषाम् उदरभरणस्य महान् कश्चित् समारम्भः क्रियते। नूनं श्लाघ्यो मम प्रयासः।

तदैव तत्र तद्गुरोः श्रीसमर्थरामदासस्य आगमनम् अभूत्। स योगदृष्ट्या तस्य भावम् अजानात् अवदत् च, अयि शिवराज! स्वहस्तिकाप्रहारेण सम्मुखस्थं महान्तं शिलाखण्डं खण्डय।

शिववीरस्तथाऽकरोत्। भग्ने तस्मिन् शिलाखण्डे स तन्मध्ये वारिणि विराजमानम् एकं भेकं निरैक्षत चकितश्च समजायत।

इंगितेन तं भेकं प्रदर्शयन् गुरु: स्वशिष्यं शिवराजम् अपृच्छत् – भो: किं त्वमेव अस्य मण्डूकस्य उदरं विभर्षि? तदाकर्ण्य शिवराज: सलज्ज: निरुत्तरश्च अवातिष्ठत्।

उपहार:



पुरा आंग्लदेशे डेला–जिम–नामानौ दम्पती न्यवसताम्। निर्धनयो: तयो: मनोरथा: कदापि पूर्णतां न यान्ति स्म। जिम: निजेन अल्पीयसा आयेन गृहस्य आवश्यकतानां पूर्तिं व्यदधात्। एकप्रकोष्ठात्मके नातिशोभने गृहे कथंचित् तौ स्वजीवनं नयत: स्म। धनाभावे सत्यपि तयो: पार्श्वे द्वे वस्तुनी अतिमहार्घे आस्ताम्। जिमस्य वलयविहीना (चेनरहिता) हस्तघटिका, डेलाया: स्वर्णवर्णा: आजानुलम्बाश्च केशा:। डेला यदा दर्पणे स्वकेशान् प्रसाधयति स्म, हर्षिता गर्विता च भवति स्म। डिम: अपि सुकेशीं भार्यां विलोक्य तस्यां भृशं अरज्यत्। तयो: परस्परं प्रगाढ: प्रणय: आसीत्।

दिसम्बरमासे क्रिसमसपर्वणि प्रत्यासन्ने डेला अचिन्तयत्, अहं पत्ये कम् उपहारं ददामि? उपहारक्रयणाय मम समीपे धनमेव नास्ति। विचारमग्ना खिन्ना च सा भृशं रुरोद। भूमौ निपतद्भिः अश्रुभिः साकं तस्या विषादोऽपि अगलत्।

सायम् असौ एकाकिनी विपणिं गता। तत्र एकम् आपणं तस्याः दृष्टिपथं यातं यत्र केशानां क्रयविक्रयौ भवतः स्म।

आपणस्य संचालिका काचित् महिला आसीत्। डेला ताम् उपगतवती पृष्टवती च 'मम केशानां कियत् मूल्यम्?

व्यापारदक्षा महिला तस्याः केशानां लम्बतां कमनीयतां च निरीक्ष्य डालर–विंशतिं दातुम् उद्यताऽभवत्। कथंचित् मनः प्रबोधयन्ती डेला केशकर्तनम् अनुज्ञातवती।

मूल्यम् आदाय डेला घटिकायन्त्राणां विपणनकेन्द्रं गता। लब्धैः डालरैः सा अतिरमणीयं स्वर्णवर्णं घटिकावलयं क्रीत्वा मुदितमनसा गृहं प्रत्यागच्छत् किन्तु नासौ साहसं बभार मुकुरं द्रष्टुम्।

तदनु सा व्यचिन्तयत् यद् अद्य क्रिसमसपर्वणि एतेन बहुमूल्येन उपहारेण पतिं विस्मयविमुग्धं विधास्यामि। जिमः अपि कतिपयैः अहोभिः पत्नीं केनापि विशिष्टेन उपहारेण प्रीणयितुम् अकामयत किन्तु न तेन मनोगतम् अभाणि। कथंचित् अल्पम् अल्पं धनं संचित्य सोऽपि महनीये तस्मिन् पर्वदिवसे आपणात् उपहारं क्रीत्वा गृहं प्रविष्टः।

तं प्रतीक्षमाणा डेला स्मितपूर्वम् अभाषत, प्रिय मुग्ध इव कथं विलोकयसि मम केशान्। मया केशान् विक्रीय त्वदर्थे घटिकावलय: क्रीत:। पश्य पश्य कियान् सुन्दर एष:? सम्प्रति वलयविहीनया घटिकया समयं पश्यन् न लज्जिष्यसे। दर्शय दर्शय घटिकाम्। वलयेन सह घटिकाया संयोग: कीदृशम: रम्यतर: इति द्रष्टुम् इच्छामि।

तद्वचांसि समाकर्ण्य आहत इव जिम: आसन्दिकायां पतित:। घटिकाविक्रयेण क्रीता स्वर्णमयी पिनसंहति: तस्य हस्ते आसीत्।

क्षणेन लब्धसंज्ञ: जिम: पत्नीम् आलिङ्गन् उच्चै: हसन् च अभणत्। प्रिये! आवयो: उपहारौ इयत्सुन्दरौ स्त: यदेतयो: उपयोगं अद्य विधातुं मन: न अनुमन्यते।

प्रथमं त्वं पाकशालात: किञ्चिद् अशनीयम् आनय। तीव्रा क्षुधा बाधते माम्।

हृदय-परिवर्तनम्



लोककल्याणकामः परमभागवतः देवर्षिः नारदः एकदा वन मार्गेण याति स्म। अकस्मात् तस्य मार्गं निरुन्धन् दस्युः रत्नाकरः उच्चैः अगर्जत्—

रत्नाकरः — क्व गच्छसि रे साधो! अर्पय मे तत् सर्वं यद् धारयसि।

नारदः — साधूनां कुतः धनम्? एकः कमंडलुः, एका च जपमाला। केवलं हरिनाम जपामि।

रत्नाकर: — अलं प्रलापै:। देहि मे धनम्। अन्यथा हनिष्यामि त्वाम्।

नारद: — अहं सत्यं ब्रवीमि। अकिंचनोऽहम्। परं प्रश्नम् एकं पृच्छामि। किं तव कुटुम्बिन: तव पापकर्मणां फल–भोक्तार: न वा?

रत्नाकर: — कथं न। अहं तेषां पालनं करोमि, मम कर्मण: समानरूपेण तेऽपि फलभाज:।

नारद: — अत्र मम सन्देह:, गृहं गत्वा पृच्छ परिवारजनान्।

रत्नाकर: — मयि गृहं गते त्वं पलायिष्यसे। जानामि तव धूर्तताम्।

नारद: — यद्येवं तर्हि मां रज्ज्वा आबध्य गृहं गच्छ।

(रत्नाकर: नारदं बृक्षेण बद्ध्वा गृहं गत:)

रत्नाकर: — (पितरौ प्रति) अहं येन केन कर्मणा धनम् आनयामि, भवन्तौ च पालयामि किं भवन्तौ मम कर्मफलस्य भोक्तारौ न वा?

पितरौ: — वत्स! पित्रो: पालनम् तव धर्म: किन्तु आवां फलभोक्तारौ न स्व:। प्राणी स्वकृतं स्वयमेव भुङ्क्ते।

रत्नाकर: — (पत्नीं प्रति) त्वं तु मम सहधर्मचारिणी। नूनं त्वं मम कर्मणां फलस्य भोक्त्री।

पत्नी — भर्त:! कर्मफलभोक्ता तु भवान् एव। सुकृत–दुष्कृत–कर्मकरणे नर: स्वतन्त्र: भवति। फलमपि तेन भोक्तव्यं नान्येन।

परिवारस्य प्रतिबचनै: उद्विग्न इव रत्नाकर: नारदम् अभ्येत्य तं बन्धात् मोचयति क्षमां च याचते। स्वै: कलुषितकर्मभि: सन्तप्यंमानं रत्नाकरं सान्त्वयन् श्रीनारद: तं मन्त्रदीक्षितं करोति।

तत: श्रीनारदोपदिष्टरामनाममन्त्रं श्रद्धया जपत: रत्नाकरस्य जीवने महत् परिवर्तनं जायते। तस्य तपसा प्रसन्न: चतुर्मुखो ब्रह्मा तं राम चरितं गातुं प्रेरयति। बाल्मीकिनाम्ना ख्यातिं गत: रत्नाकर: आदिकाव्यस्य रामायणस्य रचनां कृत्वा जगति विमलं यशो लेभे। तदीयं रामायणं भवताप – तप्तानां जीवानां कृते पीयूषधारां प्रवाहयत् भुवि विराजतेतराम्।

नम: आदिकवये वाल्मीकये।

परमं तपः



कस्मिंश्चिद् अरण्ये एकः साधुः उटजं निर्माय तपस्यति स्म। मन्त्रजपः एव तस्य प्रधानं कार्यम् आसीत्। शीत–वात आतप – वर्षादीनां कष्टानि सोढ्वा स सन्तोषवृत्त्या समयं नयति स्म। तस्य केचिद् भक्ताः नगराद् आगत्य तस्मै भोजनादिकं अददुः। कदाचित् भोजनस्य अभावे स क्षुधाकष्टम् असहत।

एकदा स्नानं कृत्वा यदा स वृक्षमूले उपाविशत्, कश्चित् काकः तत्स्य शिरसि विष्ठां विससर्ज। स तपस्वी क्रुद्धो भूत्वा उपरि

दृष्टिम् अक्षिपत् तत्क्षणम् एव स काकः दग्धो भूत्वा भूमौ अपतत्। ईदृशं तपःप्रभावं वीक्ष्य तस्य तापसस्य चित्ते अहंभावः पदम् आदधे। कोऽस्ति मादृशः तपस्वी इति चिन्तयन् साधनां परित्यज्य नगरं प्रति प्रचलितः।

क्षुधया आर्तः सन् स कस्यचिद् गृहस्थस्य द्वारम् उपेत्य भिक्षां देहि – इति उच्चैः उच्चार्य प्रतीक्षाम् अकरोत्। गृहाभ्यन्तरात् काचित् महिला अवदत् – कृपया किंचित्कालं प्रतीक्षस्व, अहं सद्यः एव गृहम् उपेतस्य पत्युः शुश्रूषायां संलग्नाऽस्मि।

कतिचित् कलाः अतीताः। स तापसः सक्रोधम् अवदत्– कथं चिरायसे भिक्षादाने। एवं त्वं तपस्विनम् अवहेलयसे जानासि परिणामम् ?

एवं तस्य कठोरवचनम् आकर्ण्य सा महिला स्मयमाना अभाषत– अहं वनस्य वराकः काकः नास्मि यः तव कोपदृष्ट्या भस्मीभूतः। क्षणं प्रतीक्षा विधेया। पत्ये भोजनं दत्त्वा अहं भिक्षाम् आनयामि।

तस्याः साभिप्रायं वचनं श्रुत्वा विस्मयविमुग्धः तापसः अचिन्तयत् – विजने वने घटितं वृत्तान्तम् एषा कथं जानाति। स भक्त्या तां प्रणम्य पृच्छति, मातः कथं भवत्या काक–दहनवृत्तम् अवगतम्।

सा अवदत् अहं पत्युः सेवां प्रथमं धर्मं जानामि। पातिव्रत्य–प्रभावात् मया वने घटितं वृत्तं ज्ञातम्। यदि किंचिद् अपरं ज्ञातुं कामयसे तदा ग्रामान्तरे रामरत्नं नाम आपणिकं पृच्छ।

तापस: तत: प्रस्थाय आपणिकम् उपेत:। स दूरत: एव तं विलोक्य प्रोवाच – भवान् तस्या महिलाया: सकाशाद् किंचित् ज्ञातुं आगत:। इह आस्यताम्।

तपस्वी पुन: विचारमग्न: जात:। मया द्वादश वर्षाणि तप: तप्तं किन्तु भूतभविष्यद्वृत्तं न जानामि। एष आपणिक: तपस्यां बिना कथं सर्वं जानाति?

विचारदोलाम् आरूढं तं वीक्ष्य आपणिक: जगाद – भो तपस्विन्! विस्मयं मा कुरु। य: जन: स्वकर्तव्यं निष्ठया आचरति तस्य परचित्तज्ञानं जायते। अहं ग्राहकेभ्य: वस्तूनाम् उचितं मानं ददामि, सत्यं च वदामि तत्प्रभावाद् अहं सर्वं भवत: चरितं वेद्मि। भवान् वृद्धौ पितरौ असहायौ परित्यज्य तपसि रत:। एतत् समुचितं न कृतम्। भवता गृहं गत्वा तयो: परिचरणं विधेयम्। तेन भवत: कल्याणं भविष्यति। कर्तव्यपालनम् एव परमं तप:।

न स्वातन्त्र्यात् परं सुखम्



एकदा कश्चिद् व्याधः आखेटार्थं सर्वं दिनं विपिने अभ्रमत्, किन्तु केवलम् एकः शुकः एव तस्य हस्तगतः जातः। शुकः सुन्दरः सुपुष्टः च आसीत्। स तं पंजरस्थं कृत्वा अपालयत्।

प्रत्यहम् आखेटाय वनगमनं तस्य व्याधस्य नैत्यिकं कर्म आसीत्। स अतिरिक्ते समये शुकं शिक्षयति स्म। कतिपयमासानाम् अभ्यासेन शुकः मनुष्यवद् वार्तालापे पाटवं दधौ। व्याधः तेन सह सर्वेषु व्यवहारविषयेषु चर्चां कृत्वा आनन्दं लभते स्म।

एकदा धनाभावसंपीडितः व्याधः तं शुकं विक्रेतुं निश्चयम् अकरोत्। पंजरस्थं तम् आदाय स आपणं गतवान्। तत्र कश्चित् श्रेष्ठी मनुष्यवाचा वदन्तं तं कीरं दृष्ट्वा विस्मितः जातः। स तस्य मूल्यम् अपृच्छत्। व्याधः अवदत् एष शुकः एव स्वमूल्यम् अभिधास्यति। तत्क्षणम् एव शुकेन उक्तम्, अस्मै पंचशतानि देहि।

श्रेष्ठी तस्मै व्याधाय शुकस्य मूल्यं दत्त्वा शुकं गृहे आनयत्।

असौ शुकः श्रेष्ठिनः गृहे सर्वविधं सौख्यम् अनुभवन् उवास। तस्मिन् शुके श्रेष्ठिनः तत्पत्न्याः च महान् अनुरागः जातः। तेन सह वार्ताविनोदं कुर्वतोः तयोः समयः सुखेन याति स्म किन्तु यदा शुकः नीलगगने पक्षान् प्रसार्य विहरतः पक्षिणः विलोकते स्म, स उन्मनाः जायते स्म। बन्धनं कस्य प्रियम्?

एकदा तस्मिन् नगरे काशीपुरीतः कश्चिद् विद्वान् वक्ता समागतः। स प्रतिदिनं रात्रौ धार्मिकं प्रवचनम् अकरोत्। श्रोतॄणां प्रश्नानाम् समाधानम् अपि तेन क्रियते स्म।

एकस्मात् मित्रात् तस्य विदुषः प्रशंसां श्रुत्वा श्रेष्ठी तेन साकं प्रवचनं श्रोतुं गतवान्। वक्तुः वैदुष्यपूर्णं प्रवचनं तस्मै अत्यर्थम् अरोचत। गृहं प्रत्यागत्य स शुकेन सह तद्विषये आलपत्।

एकस्मिन् अहनि शुकः श्रेष्ठिनं प्रार्थयत – अद्य भवान् मम जिज्ञासायाः समाधानं कर्तुं निवेदयतु तस्मै विदुषे। श्रेष्ठी अवदत् – का ते जिज्ञासा? शुकः न्यवेदयत्, मम प्रश्नोऽस्ति 'शिक्षितः कथं मुक्तिं लभते'।

प्रवचनान्ते स श्रेष्ठी शुकस्य योग्यतां ज्ञानं च उपवर्ण्य तं वक्तारं शुकस्य प्रश्नस्य समाधानम् अपृच्छत्।

प्रश्नं श्रुत्वा स विद्वान् अस्वस्थः जातः। स निश्चेतन इव भूमौ अपतत्। तं तथा विधं विलोक्य श्रेष्ठी भयाकुलो भूत्वा द्रुतं स्वगृहं प्रति प्रचचाल।


गृहम् उपेत्य स उत्तेजित इव शुकम् अभ्यधात्, यत् तव कारणात् तस्य विदुषः मरणासन्नदशा जाता। सम्प्रति स किमवस्थः, नाहं जाने।

शुकः इदम् आकर्ण्य धृतिं बबन्ध। तेन प्रश्नस्य समाधानं लब्धम् आसीत्।

पंचषः अहानि गतानि। शुकः अकस्मात् रुग्णः भूत्वा अशेत। अन्नं पानं च त्यक्तवान्। तं निश्चेष्टं ज्ञात्वा श्रेष्ठिदम्पती व्यग्रौ अजायेताम्। पक्षिचिकित्सकाः समायाताः किन्तु शुकस्य दशा तथैव आसीत्। दिनद्वयेन शुकः गतप्राणः अभवत्। सदारः श्रेष्ठी बहु व्यलपत्। दैवेच्छां स्वीकृत्य स तस्य अन्तिमसंस्कारचिकीर्षया एकं कौशेयवसनं भूमौ प्रसारितवान्। शुकं पंजरात् निष्कास्य स तस्मिन् वसनेतं निदधौ।

किन्तु आश्चर्यम्? तयोः पश्यतोः एव शुकः पक्षौ प्रसार्य उत्पत्य च तरुशाखायाम् उपाविशत्। श्रेष्ठिदम्पती स्तब्धौ आस्ताम्। तौ सानुनयं शुकम् आह्वयताम् किन्तु स शुकः वृक्षादेव तौ सम्बोधयन् अभ्यधात् – तस्मै विदुषे मम धन्यवादाः कथनीयाः यस्य कृपया अद्य अहं चिरबन्धनात् मुक्तिम् अलभे। भवद्भ्याम् अपि मम अन्तिमाः प्रणामाः। इत्युक्त्वा स व्योम्नि विहर्तुम् उत्पतितः।

वर्तमाने रमस्व



एकस्मिन् नगरे कश्चित् महाधनः पुरुषः न्यवसत्। किं नासीत् तस्य समीपे? सुन्दराणि भवनानि, विशालं वैभवम्, आज्ञापालनतत्पराः सेवकाः सुशीला भार्या, पुत्राः पौत्राः, सर्वाणि सौख्यसाधनानि च।

एकदा तस्य मनसि विचारः समुद्भूतः यत् मया सञ्चितं सर्वं धनं परिगणनीयम्। सकल–धन–रत्न–सुवर्णानां राशीन् गणयित्वा स आजीवनं पुत्राणाम् उपभोगाय धनराशिं निश्चितं कर्तुम् इयेष किन्तु निश्चितधनराशेः विभागानन्तरं पौत्रेभ्यः किमपि नावशिष्यते स्म।

किं मम पौत्राः निर्धनाः भूत्वा जीवनं यापयिष्यन्ति? एतत् कथम्?

किं मया तेभ्यः अपि धनं सञ्चयनीयम्? पुनः विचारयति श्रेष्ठी, बार्धक्यम् उपेतः अहं यदि पुनः आत्मानं व्यापारे प्रवर्तये, तदा शारीरिकं कष्टं सम्भवति। किमेतद् मम वाञ्छनीयं स्यात्, नैव, नैव।

तदा किं करोमि इति चिन्तावशः भूत्वा स निद्रासुखेन अपि वञ्चितः जातः। क्रमशः क्षुधा अपि निवृत्ता। समारोहाः अपि तस्मै न अरोचन्त। जीवनं नीरसं जातम्।

तेषु दिनेषु कश्चिद् विद्वान् पुरुषः तस्मिन् पुरे समायातः। स प्रतिदिनं रात्रौ प्रवचनं करोति स्म। अनेकाभिः समस्याभिः आक्रान्ताः जनाः तमुपगच्छन्ति स्म। स तेषां समस्यानां यथामति समाधानं विदधाति स्म।

मासद्वयं व्यतीतम्। श्रेष्ठिना अपि तस्य प्रशंसा श्रुता। एकदा स तं विद्वांसं द्रष्टुं तस्य निवासं गतवान्। कुशलप्रश्नानन्तरं श्रेष्ठी स्वां समस्यां प्रस्तुवन् आह – यन्मया सञ्चितं धनं पुत्राणाम् आजीवनम् उपयोगाय तु विद्यते, किन्तु पौत्राणां कृते नास्ति। एतया चिन्तया गृहीतः अहं रात्रौ अपि निद्रां न लभे। भोगेषु मे वितृष्णा जाता। किं करोमि? भवान् तु ज्ञानवान्। कृपया मम मार्गदर्शनं कृत्वा अनया चिन्तापिशाच्या पीडितं माम् उद्धरतु।

स विद्वान् पुरुषः तं सम्बोधयन् उवाच – भो श्रेष्ठिन्! अहम् एकम् उपायं ब्रवीमि। अवहितो भूत्वा शृणु –

अस्मिन् नगरे शिवमन्दिरसमीपे एका जीर्णकुटी वर्तते। तस्यां द्वे स्त्रियौ वसतः। तयोः एका श्वश्रूः अपरा तस्या वधूः। यदि त्वं ताभ्याम्

एकस्य दिनस्य भोजनद्रव्याणि दास्यसि, तव चिन्तायाः समाधानं भविष्यति।

श्रेष्ठी ईदृशं सुकरम् उपायं श्रुत्वा आनन्दितः जातः तं ज्ञानिनं पुरुषं प्रणम्य स स्वगृहं प्रति प्रययौ।

अपरेद्युः प्रातर्वेलायां भोजनसामग्रीम् आदाय स श्रेष्ठी कुटीम् उपेतः। तदा सा वधूः संमार्जन्या कुटीं संमार्जयति स्म। श्रेष्ठी तस्याः पुरतः भोज्यसामग्रीं निधाय प्रार्थयत यत् एतद् भोजनं स्वीकृत्य अनुगृह्णातु मां भवती।

साऽब्रवीत् मम श्वश्रूः ध्यानमग्ना अस्ति, अतः किञ्चित्कालं प्रतीक्षा विधेया। इदम् आसनम् आस्यताम्।


ध्यानाद् उत्थिता श्वश्रूः तेन श्रेष्ठिना भोजनं ग्रहीतुं प्रार्थिता, किन्तु साऽवदत्, महाभाग! अद्यतनं भोजनं विद्यते अस्मत्पार्श्वे। अतः अहम् इदं स्वीकर्तुं न शक्नोमि। कृपया प्रतिनीयताम् एतत्।

श्रेष्ठी उवाच, मातः! निधीयताम् एषा भोज्यसामग्री। श्वस्तनं भोजनं कल्पिष्यते।

श्वश्रूः सविनयं प्रतिवचनम् अदात्— नाहं संग्रहं करोमि। अद्य वा श्वो वा किं भविता, इति कोऽपि न जानीते। येन परमेश्वरेण अद्यतनं भोजनं दत्तं, स श्वः अपि दास्यति। भवतः आगमनेन मम कुटी पवित्रा जाता। अहं भवतः अभिनन्दनं धन्यवादं च करोमि।

तद्वचांसि निशम्य श्रेष्ठी ततः न्यवर्तत। अद्य स परमसन्तुष्टः आसीत्।

अर्ध-वस्त्रम्



फ्रांसदेशे सपुत्रपत्नीकः कश्चिद् व्यापारी प्रतिवसति स्म। तस्य पार्श्वे विपुलं धनम् आसीत्। एकदा कैश्चिद् जनैः सह तस्य घोरः कलहः जातः। कदाचित् ते मां हन्युः इति शङ्कया स सर्वां भूसम्पत्तिं विक्रीय नगरान्तरे निवासं चक्रे। तत्र तेन सर्वविधसौख्यसमन्वितं गृहं निर्मापितम्। वाणिज्यया धनार्जनम् अपि कृतम्।

दैवदुर्विपाकात् तस्य भार्या रुग्णा भूत्वा कैश्चिद् दिनैः दिवं प्रयाता। तद्वियोगेन अत्यर्थं पीडितः स कथंचित् कालं निनाय। वार्धक्यात् अशक्ततया स व्यापारकर्म तत्याज। तदैव तत्पुत्रस्य विवाहः एकया सुरूपया कन्यया सह संवृत्तः। कन्यापक्षतः

निर्धारितपणानुसारं तेन सर्वा सम्पद् पुत्राय प्रदत्ता।

वर्षद्वयान्ते तस्य गृहे पौत्रस्य जन्म अभवत्। तस्य जन्मना परिवारे आनन्दस्य संचारः जातः।

यदा शिशुः पंचवर्षः जातः तदा तत्पिता स्वजनकम् अवदत्, अस्मिन् गृहे भवता सह वसतः मम द्वादशवर्षाणि जातानि। सम्प्रति भवान् एतद् गृहं विहाय अन्यत्र गच्छतु। नाहं भवता सह वस्तुं शक्नोमि। मम पत्नी अपि भवतः अवस्थानं न वाञ्छति।

वृद्धः पिता तस्य वज्रनिपातोपमं वचः समाकर्ण्य स्तब्धः जातः। ततः स पुत्रम् उवाच, अधुना देहेन क्षीणः वित्तेन हीनः, शक्त्या रहितः रोगेण सहितः एकाकी क्व गच्छामि? किं करोमि? यावन्ति दिनानि मम शेषाणि, माम् अनुजानीहि अत्र निवस्तुम्।

पुत्रोऽवदत्, नाहं शृणोमि एतं प्रलापम्। गच्छतु भवान्। निराशः सन् पिता अवदत्, एतस्मिन् दारुणे शीते ऊर्णावस्त्राभावात् मरिष्यामि। कृपया देहि मे शीतनिवारकं वस्त्रम्।

तनयः सरोषम् अवदत् – नास्ति किञ्चिद् वासः। गम्यताम्। स पुनः पुत्रम् अभ्यर्थयत् – कृपया अश्वपृष्ठास्तरणम् एव मे देहि, येन शैत्यम् अपनयामि।

तदा करुणया पुत्रः निजं पंचवर्षं पुत्रम् आदिशत्, पितामहाय अश्वास्तरणम् आनीय प्रयच्छ।

वृद्धस्य पौत्रः पाकशालातः कर्तनीं गृहीत्वा तया आस्तरणं मध्येन द्विधा अकरोत्। अर्धं पितामहाय अयच्छत्। तद्वीक्ष्य तत्पिता पुत्रम् अपृच्छत्, कथम् अर्धं दत्तवान् असि?

पुत्रः मुग्धभावेन प्रत्यवदत् – मया अर्धः वस्त्रखण्डः भवते शेषितः। यथा भवान् मम पितामहं गृहात् निष्कासयति तथा अहम् अपि वयस्कः भूत्वा भवन्तं निःसारयिष्यामि। तदा अर्धं वस्त्रं भवतः उपयोगाय कल्पिष्यते। पुत्रस्य वचनं श्रुत्वा पिता स्तब्धः जातः। तस्य मानसं भाविकल्पनाभिः आकुलं संवृत्तम्। किम् अहम् अपि वार्धक्ये प्राप्ते पितेव असहायो न भविष्यामि? किं पालयिष्यति मां मत्पुत्रः? सोऽपि नूनं तदेव करिष्यति, यदहं करोमि। नहि, नहि, नाहम् एवं करिष्यामि।

एवं कल्पनासु मग्नस्य तस्य नेत्रे अश्रुपूर्णे जाते। सगद्गदकण्ठम् पितरम् उवाच, क्षम्यतां ममायं घोरः अपराधः। कीदृशं कलुषं चिन्तितम् आसीत् मया। भवान् क्वचित् न गमिष्यति। भवान् अत्रैव स्थास्यति।

समीचीनः निर्णयः



नृपतिः श्रेणिकः तत्पत्नी चेतना च भगवतः महावीरस्य दर्शनं कृत्वा राजभवनं प्रति प्रस्थितौ। मार्गे दारुणे शीते तपस्यन्तम् एकं मुनिं अवलोक्य तौ चकितौ बभूवतुः।

राजभवनम् उपेत्य श्रान्ता चेतना निद्रावशं गता। रात्रौ तस्याः एकः हस्तः शय्यातः नीचैः आलम्बत। प्रातः प्रबुद्धा सा तस्मिन् हस्ते शैत्यकारणात् शोथम् अपश्यत्। परिचारकाः अग्नितापेन उष्णताम् उत्पाद्य हस्तस्य उपचारम् अकुर्वन्।

उपचारवेलायां सहया राज्ञ्या: चेतनाया: मनसि तस्य मुने: विचार: आगत: य: भयंकरे शीते तप: तपति स्म। तस्या: मुखात् एतद् वचनं निर्गतं तस्य वराकस्य का दशा भविष्यति इति।

श्रेणिक: एतद् वचनं श्रुत्वा अचिन्तयत् यत् राज्ञी कस्मिंश्चित् पुरुषे आसक्ताऽस्ति। स मन्त्रिणम् आहूय अन्त:पुरं दग्धुम् आदिदेश।


तत्पश्चात् स दु:खितेन मनसा त्रिकालज्ञं भगवन्तं महावीरम् उपगम्य सर्वं निवेदितवान् आत्मन: व्यथां च प्राकटयत्। भगवान् महावीर: क्षणं ध्यात्वा नृपतिम् उक्तवान् यत् राज्ञी चेतना सर्वथा निर्दोषा पवित्रा च अस्ति।

एतत् परिज्ञाय आत्मकृत्यं शोचन् नृपति: तत्क्षणं मन्त्रिणम् आहूय अपृच्छत्— किं दग्धम् अन्त:पुरम्।

अमात्येन उक्तम्, भवत: आदेश: तु पालनीय: एव।

इत्याकर्ण्य शोकोद्वेगेन राज्ञ: दशा शोचनीया जाता। तदा तं सान्त्वयन् मंत्री उवाच राजन्! अलं शोकेन। अन्तपुरं सुरक्षितम्। मया केवलम् हस्तिशाला अग्निदाहेन दग्धा। अहं वेद्मि यत् क्रोधदशायां कृत: निर्णय: हानये भवति। नृप: प्रमोदम् अवाप।

मनसः समता



एकस्मिन् यूनि नवनवकलाः शिक्षितुं महान् उत्साहः आसीत्। स नौचालनम्, शरसन्धानं, शरनिर्माणम्, गृहनिर्माणकलां, चित्रकलां, मूर्तिकलां च अशिक्षत।

स विचारयति स्म, यन्मया प्रभूताः कलाः शिक्षिताः सन्ति। मादृशः कलापारङ्गतः अस्मिन् नगरे कोऽपि नास्ति।

तस्य ईदृशं भावं ज्ञात्वा भगवान् बुद्धः व्यचारयत् यद् अयं बालः तां कलाम् अपि शिक्षेत, या सर्वाः कलाः अतिशेते।

एकदा स भिक्षापात्रम् आदाय तस्य यूनः गृहं जगाम। स तस्य परिचयं ज्ञातुम् ऐच्छत्। भगवान् तथागतः सस्मितम् अवदत्– अहं शरीरनियन्त्रणपटुः अस्मि।

स तरुणः तदर्थं न अजानात्, अतः स न्यवेदयत् यत् कृपया स्वाभिप्रायः विशदीक्रियताम्।


भगवान् अब्रवीत्, वत्स! यः शरसन्धानं जानाति, स शरं क्षिपति, यः नावं चालयितुं जानीते, स नावं चालयति। अश्वारोहणे निपुणो जनः अश्वम् आरोहति। एवं ज्ञानी पुरुषः आत्मनि शासनं करोति।

युवा अपृच्छत्, तत् कथम्? तं प्रबोधयन् भगवान् उवाच, ज्ञानी पुरुषः परकृतप्रशंसया चंचलः न भवति, न च परकृतनिन्दया उद्वेगं भजते।

ईदृशः पुरुषः सुख–दुःख–मानापमान–शीतोष्णेषु समानभावेन व्यवहरति। स जीवनस्य कलां जानाति। किं त्वया सर्वकलासु मूर्धन्या एषा कला शिक्षिता?

तरुणः निरुत्तरः आसीत्।

परदोषदर्शनम्



ईरानदेशस्य शीराजनगरे १८८६ तमे ख्रीष्टाब्दे लब्धजनुषा परम- विदुषा शेखसादीमहाभागेन स्वजीवनस्य घटनैका इत्थं वर्णिताऽस्ति-

विद्याविनयसम्पन्ने धर्मप्राणे सदाचारसम्पन्ने एकस्मिन् परिवारे मम जन्म जातम्। जनकः साधुस्वभावः शीलधनः धर्मग्रन्थस्य च नित्यपाठी आसीत्। बालस्यापि मम तथैव धर्मे प्रवृत्तिरासीत्। अहम् अपि नित्यं कुरआनस्य पाठम् अकरवम्। पाठं श्रोतुम् अनेके प्रतिवेशिनः

दैनिककृत्यानि निर्वर्त्य रात्रौ आयान्ति स्म।

एकस्मिन् दिने रात्रौ कुरआनं पठतः मम अनेके श्रोतारः गृहे समायाताः। अचिराद् एव तेषु केचित् निद्रावशं गताः, केचन तन्द्रापराभूताः अनवधाना जाताः। केवलं मम पिता द्वित्राः च अन्ये श्रोतारः श्रद्धया पाठं शुश्रुवुः।

अवसिते कुरआन पाठे शयानान् श्रोतॄन् अभिलक्ष्य मयोक्तम् – स्वपत्सु एषु श्रद्धायाः अभावः वर्तते। यदि तैः शयनीयम् एव तदा किमर्थम् इह आगच्छन्ति। एतैः धर्मग्रन्थस्य समादरः तु करणीयः।

मम इदं वचनं पित्रे न अरोचत। स उद्विग्नः सन् अवदत् – परदोषदर्शनापेक्षया तवापि शयनम् एव वरम् – यतो हि परदोषदर्शी नरः धार्मिको न भवति।

मुधा कलहः



एकस्य जनस्य पार्श्वे विपुला भूसम्पत्तिः आसीत्। प्रायः तस्य भूसम्बन्धिनः विवादाः प्रचलन्ति स्म। न्यायालये गतागतैः बहुधनव्ययैः अभियोगैः, विलम्बितैः निर्णयैः, विधिवक्तॄणां असत्यव्यवहारैः च असौ अत्यन्तं व्याकुलः आसीत्। अनेकैः रोगैः अभिभूता तस्य पत्नी प्रायः चिकित्सकानां परामर्शेन औषधसेवनं करोति स्म। एकस्मिन् दिवसे स पुरुषः पत्नीम् अवदत्, अहं भूविवादैः अभियोगैः च भृशं दुःखी अस्मि। अतः अहं पुत्रं विधिवक्तारं द्रष्टुम् इच्छामि, येन एभ्यः कष्टेभ्यः मुक्तिं लभेय।

पत्नी बभाषे, किं न पश्यति भवान् रुजाक्रान्तां माम्। नित्यम् औषधं सेवमाना अहं व्याकुलाऽस्मि जाता। अहं तु पुत्रं चिकित्सकं विधास्यामि। स मां रोगमुक्तां करिष्यति।

उभौ स्वमते आग्रहिणौ आस्ताम्। क्रमशः वाक्कलहः सम्प्रवृत्तः। उच्चैः स्वरेण क्रोशन्तौ तौ विलोक्य तेन पथा गच्छन्तः जनाः एकत्रिता बभूवुः। विवादविषयं ज्ञात्वा ते अवदन्, युवयोः मतं तु श्रुतम् अस्माभिः। पुत्रः किं चिकीर्षति, तस्य मतम्अपि ज्ञातव्यम्। आहूयतां स्वपुत्रः।

जनानां जिज्ञासया तौ संज्ञां लब्धवन्तौ। पुत्रः तु जातः एव नासीत्।

रक्षिता महान् भवति



मधुमासः। रमणीया प्रभातवेला। आरक्तं गगनमण्डलं भगवतो मरीचिमालिनःप्रथमरश्मिभिः। आनन्दयन् समस्तान् लोकान् प्रवाति स्म मन्दसुगन्धः पवमानः। विचित्रवर्णच्छदानां खगानां मधुरैः आरवैः गुंजन्ति स्म दिशः।

राजकुमारः सिद्धार्थः प्रकृतेः मञ्जुलतां विलोकितुकामः स्वभवनात् बहिः आजगाम। उपवने विहारचिकीर्षया यदा स द्वित्राणि पदानि अचलत्, कश्चित् शरविद्धः हंसः तत्समीपे भूमौ पपात। सिद्धार्थः धावित्वा तम् अगृह्णात्।

ततः मृदुस्पर्शेन हस्तेन हंसं लालयन् स तस्य देहात् शरं शनैः चकर्ष, भवनं च नीत्वा तस्य उपचारं चक्रे। कृतज्ञताम् इव प्रकटयन् लोचनाभ्यां स हंसः सिद्धार्थस्य हस्ते निश्चिन्तः इव अभूत्।

तदैव स्वलक्ष्यभूतं हंसं गवेषयन् धनुर्हस्तः देवदत्तः तत्र आजगाम। करधृतहंसं सिद्धार्थं विलोक्य स कर्कशवाण्या तम् अवदत्– देहि मे हंसम्। मम शरलक्ष्यभूतोऽयं हंसः मदीय एव।

सिद्धार्थः अभाषत, नैव दास्यामि। एष मम शरणापन्नःशरणागतं नैव त्यक्ष्यामि।

ततः हंसम् अधिकृत्य तयोःमध्ये विवादः सम्प्रवृत्तः। उभौ निर्णयार्थं राजसभां गतौ।

सर्वं वृत्तं समाकर्ण्य शुद्धोदनः आदिशत् सिद्धार्थ! मुच्यताम् एष हंसः। त्वं देवदत्तश्च मम समक्षे तिष्ठतम्। एष हंसः यस्य समीपं गच्छेत स एतस्य स्वामी

हंसः मुक्तः अभवत्। स व्रणवेदनया शनैः शनैः चलन् सिद्धार्थम् उपेयिवान्। स तम् अङ्के अधारयत्। सर्वे करतालिकाभिः सिद्धार्थस्य अभिनन्दनं चक्रुः।

ततः राज्ञा उक्तम्, एष हंसः सिद्धार्थस्य एवारक्षिता हिंसकात् महान् भवति।

लक्ष्यवेधः



बुन्देलखण्डे ओरछा समीपे सातारनाम्नी एका सरिद् वहति। तस्याः तीरे एकां लघुकुटीं निर्माय कश्चित् कौपीनधारी ब्रह्मचारी वसति स्म। सरितः परिसरे वनम् आसीत्। समीपस्थग्रामवासिनः पारिवारिकेषु उत्सवेषु तं ब्रह्मचारिणम् आमन्त्रयन्ति स्म। असौ मन्त्रान् उच्चार्य पूजादिकर्म सम्पादयति स्म।

एकदा कश्चिद् वनाधिकारी तत्र समायातः। स तत्र निवसन्तं ब्रह्मचारिणम् अवदत्– अस्मिन् वने कश्चिद् वन्यः शूकरः बहुम् उत्पातं करोति। वयं तं हन्तुम् इच्छामः। त्वम् अपि मया सह यास्यसि।

ब्रह्मचारी अभाषत – अहं हिंसकेभ्यः पशुभ्यः बिभेमि। अतः नाहं जिगमिषामि। अधिकारी तस्मै भुशुण्डीं दत्त्वा अकथयत् यत् एतां स्वहस्ते धारय। तव भयम् अपयास्यति।

ब्रह्मचारी भीतः इव अवदत्– अहं भुशुण्डीचालनं न जानामि। अधिकारी तं सान्त्वयन् अवोचत्, यदि शूकरः तव समीपम् आगच्छेत्, तदा त्वं भुशुण्ड्याः पृष्ठभागेन तस्मिन् प्रहरिष्यसि। अलं भयेन। अहम् अपि तव साहाय्यं करिष्यामि।

अधिकारिणः अनुरोधेन ब्रह्मचारी तेन सह प्रस्थितः। जनानां समवेतकोलाहलाद् भीतः शूकरः एकस्याः लतायाः निर्गत्य पलायनं चक्रे। अधिकारी तस्मिन् गुलिकाम् अचालयत् किन्तु सा लक्ष्याद् भ्रष्टा जाता।

किन्तु तदैव एकया गुलिकया शूकरः आहतः भूत्वा भूमितले भ्रमिं चकार। एषा गुलिका ब्रह्मचारिणः भुशुण्ड्याः चालिता आसीत्।


अधिकारी तम् अपृच्छत्, त्वया उत्सृष्टा गुलिका शूकरस्य मर्मणि लग्ना। कथम् एतत्– त्वं तु आत्मानम् भुशुण्डीचालने अनभिज्ञं वदसि किन्तु त्वं सिद्धलक्ष्यः प्रतीयसे।

ब्रह्मचारी प्रत्यवदत्, शूकरदर्शनभीतस्य मम भुशुण्डयाः दैवयोगेन गुलिका निर्गता। तया शूकरः हतः। तदा मम हस्तौ कम्पमानौ आस्ताम्। नाहं वस्तुतः जानामि भुशुण्डीचालनम्।

किन्तु तस्य लक्ष्यवेधेन प्रभावितः अधिकारी सन्देहं प्रकटयन्

आत्मीयभावेन तं पप्रच्छ, कृपया आत्मपरिचयं देहि। ब्रह्मचारी तं स्वकुटीरे नीतवान्, शपथं दत्त्वा एकान्ते अब्रवीत् यत् इदं वृत्तं कस्यापि न आख्येयम्। अहम् अस्मि चन्द्रशेखरः आजादः।

सर्वोत्तमं धनम्



एक निर्धनं जनं चिन्तामग्नं वीक्ष्य कश्चित् धनी पुरुषः तम् अपृच्छत्, कथं त्वम् उदासीनः लक्ष्यसे? स उवाच, धनाभावेन पीड़ितः अस्मि, किं करोमि, क्व गच्छामि?

प्रश्नकर्ता प्रत्यवदत्, त्वं सत्यं न भाषसे। तव समीपे तु महती सम्पद् विद्यते।

निर्धनः – कथं भवान् उपहसति माम्?

धनी – तव द्वौ कर्णौ स्तः। एकं कर्णं छित्वा मह्यं देहि। अहं सहस्रं ददामि।

निर्धनः — न दास्यामि कर्णम्।

धनी — किम् एकम् अक्षि दास्यसि दशसहस्राणि ददामि।

निर्धनः — नैव दास्यामि ममाक्षि।


धनी — एकं हस्तं यदि दद्याः पंचाशत् सहस्राणि यच्छामि।

निर्धनः — नैतत् शक्यम्।

धनी — ईदृशेषु बहुमूल्येषु अङ्गेषु सत्सु अपि त्वम् आत्मानं निर्धनं ब्रूषे। नूनं तव मस्तिष्के विकृतिः जाता। एष विशालः संसारः तव कर्मक्षेत्रम्। एषाम् अङ्गानाम् उपयोगेन मनसः योगेन च कर्माणि समाचर नास्ति विचारदृशां पौरुषजुषां च कृते कर्मणाम् अभावः।

तदुपदेशं निशम्य तस्मै धनिने धन्यवादान् वितरन् स समुत्साहेन दीप्तः प्रतस्थे।

विशेषज्ञता



एकस्य श्रेष्ठिनः एका बृहती निर्माणी आसीत्। तस्यां निर्माण्यां सहस्रशः श्रमिकाः कार्यं कुर्वन्ति स्म। प्रतिदिनं लक्षशः रूप्यकाणाम् आयः भवति स्म।

एकदा यन्त्रे काचिद् विकृतिः आगता। कार्यम् अवरुद्धं जातम्। श्रमिकाः बहिः आगच्छन्। यन्त्रस्य विकृतिं समाधातुं कृता अनेके यत्नाः निष्फलाः जाताः।

यन्त्रस्य अवरोधेन महती हानिः भवेत् इति विचार्य श्रेष्ठी नगरात्

एकं यन्त्रविशेषज्ञम् आहूतवान्। स यन्त्रं ध्यानेन निरीक्ष्य अवदत्, अहं यन्त्रं सुचारु चालयिष्यामि। मम पारिश्रमिकं दशसहस्ररूप्यकाणि। यदि भवान् एतं राशिं दातुम् उद्यतः, अहं यन्त्रं समादधामि।

कार्यविरोधजनितहानिशङ्कया स श्रेष्ठी तं समाधाने न्ययोजयत्। तेन लौहहस्तिकया यन्त्रस्य एकदेशे प्रहारः कृतः। यन्त्रं यथावत् कार्ये प्रवृत्तं जातम्।

श्रेष्ठी तं विशेषज्ञम् अवदत् – एतस्य लघुनकार्यस्य कृते एतावद् बृहत् पारिश्रमिकं समुचितं नास्ति।

सोऽवदत्, यन्त्रे आघातं विधातुं कोऽपि शक्तः स्यात्, किन्तु आघातः कुत्र करणीयः एतद् अहं जानामि, न सर्वे। दीयतां मम पारिश्रमिकम्।

श्रेष्ठी निरुत्तरः, सन् यथानिश्चितं राशिं तस्मै ददौ।

अन्तर्दीपः



कश्चित् जनः प्रतिदिनं निश्चिते समये आगत्य मन्दिरे दीपं प्रज्वालयति स्म। दीपं प्रज्वालयतः तस्य षण्मासाः जाताः।

मन्दिरस्य समक्षे एकं गृहम् आसीत्। तस्य स्वामी प्रतिदिनं तं दीपं प्रज्वालकं पश्यति स्म। एकदा असौ तं जनम् अवदत्– धन्यस्त्वं, यः शीत–वातातप–वृष्टिकष्टानि सोढ्वा नित्यम् अत्र दीपं प्रज्वालयितुं समायासि। प्रतीयते, भगवति तव परमा भक्तिः अस्ति।

सोऽवदत्, मया एकस्मिन् अभियोगे जयप्राप्त्यै श्रीभगवान् प्रार्थितः आसीत् यत् यदि अहं जयामि, नित्यं मन्दिरे दीपं प्रज्वालयिष्यामि।

भगवत्कृपया अहम् अभियोगे जितवान्। तदाप्रभृति वचनं पालयन् अहं मन्दिरम् आयामि।

गृहस्वामी तम् अपृच्छत्, कीदृशः अभियोगः आसीत्? स उवाच, मम गृहस्य समीपे मम प्रतिवेशिनः भूमिः आसीत्। सा भूमिः मया अधिगृहीता। प्रतिवेशिना मयि अभियोगः कृतः, किन्तु भगवदनुग्रहेण अहं जयम् आप्नुवम्।

इत्युक्त्वा तस्मिन् 'भक्तप्रवरे' गृहं प्रति प्रस्थिते गृहस्वामी दीर्घं निःश्वस्य उवाच, एतेन मन्दिरे तु दीपः ज्वालितः, किन्तु अस्य अन्तर्दीपः प्रकाशहीनः।

बुद्धिर्निधानं परमं हिलोके



मगधदेशस्य शासकः महापद्मनन्दः विवेकहीनः दुराग्रहपूर्णः अत्याचारपरायणः च आसीत्। तस्य अन्यायपूर्णैः कृत्यैः प्रजाजनाः पीडिताः आशङ्किताः च आसन्। मूर्खैः चाटुकारैश्च परिवृता आसीत् तस्य राजसभा।

एकदा कुपितेन नन्देन सेनापतिः कारायां क्षिप्तः। तस्य परिवारः अपि राजभयात् कथंचित् समयम् अत्यवाहयत्।

एकदा सेनापतेः पुत्रः चन्द्रगुप्तः गृहाद् बहिः क्रीडति स्म। तेन सह कतिचन अन्ये बालकाः अपि आसन्। चन्द्रगुप्तः तदा राज्ञः, अन्ये बालकाः च कर्मचारिणाम् अभिनयम् अकुर्वन्। अस्मिन् राजसभायाः दृश्याभिनये चन्द्रगुप्तस्य आदेशाः राजवद् प्रभावशालिनः आसन्।

चन्द्रगुप्तस्य तां राजक्रीडां विलोक्य प्रभावितः महापण्डितः नीति–शास्त्रविचक्षणः आचार्यचाणक्यः तम् उपससाद प्रार्थयत च राजन्! अहं दुग्धम् इच्छामि, मह्यम् धेनुः प्रदीयताम्।

बालोऽवदत् – भो ब्राह्मण! पश्य, समक्षे चरन्तीभ्यः गोभ्यः एकां द्वे वा गावौ गृहं नय।

ब्राह्मणोऽवदत् यदि गवां स्वामी गां नेतुम् अनुमतिं न दद्यात् तदा किं करिष्यामि?

बालकः अभ्यधात् – मयि शासति कस्य ईदृशं साहसं, यत् स भवन्तं गोग्रहणात् निवारयेत्।

चाणक्यः तस्य अभिनयेन प्रीतः जातः। स तस्य मातरं प्राबोधयत्, यत् तव बालकः साहसी राजोचितगुणसम्पन्नः अस्ति। एनं शिक्षाप्राप्तये राजकुलं प्रेषय। चाणक्यस्य अनुरोधेन सा अन्येद्युः तं राजसभां निनाय।

तेषु दिनेषु राजानः अपरेषां राज्ञां बुद्धिचातुर्यं शौर्यं च परीक्षितुम् अनेकेषाम् उपायानां प्रयोगं कुर्वन्ति स्म। तस्मिन् दिने एकेन राज्ञा बुद्धिपरीक्षार्थं नन्दस्य सभायां एकः पंजरस्थः सिंहः प्रेषितः। पंजर–

द्वारस्य उद्घाटनं विना सिंहः बहिः आयातु, इति समयः निश्चितः आसीत्।

राज्ञः बुद्धिहीनाः सदस्याः मौनम् अतिष्ठन्। ते किमपि कर्तुं न अपारयन्। तदा चन्द्रगुप्तः पंजरस्थं सिंहं ध्यानेन निरीक्ष्य राज्ञे निवेदनं चकार, अहम् इमं सिंहं द्वारम् अनुद्घाट्य निःसारयामि, यदि आदेशः स्यात्।

तद्वचनं श्रुत्वा भूपतिः तस्य बालकस्य परिचयं पृष्टवान्। तं सेनापतेः आत्मजं विदित्वा स कोपाद् अवदत्, यदि त्वं सफलः न भविष्यसि, अस्मिन् पंजरे क्षेप्स्यसे।

बालकस्य जननी भयाद् अवेपत किन्तु स बालकः परितः अग्निं प्रज्वाल्य सिंहं द्रवितं चकार। वस्तुतः स सिंहः सिक्थनिर्मितः आसीत्। अतः स वह्नितापेन द्रवीभूय बहिः आगतः।

चन्द्रगुप्तस्य चातुर्यं निरीक्ष्य राजा विद्याध्ययनाय तं तक्षशिलाविश्वविद्यालये प्रेषितवान्।

अयं चन्द्रगुप्तः वयस्कः भूत्वा आचार्यचाणक्यस्य निर्देशम् अनुसृत्य नन्दनृपतीन् निहत्य मगधसम्राट् अभवत्। तस्य शासनकाले भारतम् अपूर्वां समृद्धिं प्रतिष्ठां च अलभत।

कामनाजालम्



एकदा भगवान् बुद्धः पाटलिपुत्रे चातुर्मासं कृतवान्। तस्य प्रवचनानि श्रोतुं बहवः जनाः आयान्ति स्म।

एकस्मिन् दिवसे सभायां सहस्रशः लोकाः उपस्थिताः आसन्। बुद्धस्य प्रियशिष्यः आनन्दः तम् अपृच्छत् – भगवन्! एतस्मिन् महति जनसमवाये भवान् कं सर्वाधिकं सुखिनं मन्यते?

तथागतः अब्रवीत्, पश्य, अन्तिमायां पंक्तौ स्थितः दुर्बलदेहः कन्थाधारी नरः सर्वाधिकः सुखी अस्ति।

एतत् कथम् इति पृष्टः भगवान् बुद्धः अभाषत, अहं तव समक्षे एव एतान् पृच्छामि, ततः सत्यं ज्ञास्यसि।


स प्रत्येकं जनं प्रश्नं पृष्टवान्, 'किम् इच्छति भवान्'।

तेषाम् उत्तराणि आसन् – 'धनम् इच्छामि', सन्ततिम् इच्छामि', रोगात् मुक्तिं कामये,' अभियोगे विजयं कामये' आदि।

अन्ते स तं कृशकायं जनं पृष्टवान्। स प्रत्युवाच, काऽपि कामना मे नास्ति। अहं सर्वथा सुखी अस्मि। यदि भवान् मयि प्रसन्नः अस्ति, तदा मम मनसि काचिद् इच्छा अवशिष्टा भवेत् तां निरस्यतु।

वस्तुतः कामनारहितः नरः एव संसारे सुखी भवति।

सन्ति सन्तः कियन्तः



महाराष्ट्रे श्रीसमर्थरामदासः प्रसिद्धः महात्मा आसीत्। सः अहर्निशं भगवद्भक्तौ लीनः स्वजीवनं चरितार्थं करोति स्म।


एकदा असौ मध्याह्नवेलायां कस्यचित् गृहस्थस्य द्वारमु[illegible] भिक्षाम् अयाचत। वृद्धा गृहस्वामिनी कर्कशस्वभावा कोपना च आसीत्। तदा सा एकेन गोमयोपलिप्तेन वस्त्रेण गृहे लेपनं करोति स्म। द्वारि साधुं स्थितं विलोक्य तस्याः कोपः परां कोटिम् अध्यारूढः। सा गोमयलिप्तं वस्त्रं श्रीरामदासस्य मुखे क्षिपन्ती अवदत्, गृहाण भिक्षाम्। ततः सा द्वारम् निरूद्धं चकार।

तस्याः ईदृशाद् अशोभनाद् व्यवहाराद् अपि अनुद्विग्नः स महात्मा नदीतीरं गत्वा तद् वस्त्रं सम्यक् प्रक्षालितवान्, स्नानं च विधाय आश्रमं प्रत्यावृत्तः।

तत्पश्चात् श्रीसमर्थः तेन वस्त्रेण दीपवर्तिकाः अरचयत्। प्रतिदिनं ताभिः वर्तिकाभिः दीपं प्रज्वाल्य आह्निकीं पूजां सम्पाद्य स परमेशं प्रार्थयत यत् तस्याः अज्ञानोपहतायाः वृद्धायाः हृदयम् अनेन दीपेन सदृशं प्रकाशितं भवतु। तस्याः मनसि भक्तिसौमनस्य–औदार्यभावनाः विकासं प्राप्नुयुः।

कतिपयदिनान्ते सा जरती महिला आश्रमम् उपेत्य तस्य महात्मनः समक्षे आत्मकृत्यं निन्दन्ती अनुतपन्ती च क्षमाम् अयाचत। श्रीसमर्थः ताम् उपदिश्य गृहं प्रैषयत्।

सत्यं विजयते



एकस्मिन् ग्रामान्तर्गते लघुमन्दिरे कृतनिवासः बाबाभारतीनामा कश्चित् साधुः सन्तोषवृत्त्या स्वप्राणयात्रां निर्वहति स्म। तस्य पार्श्वे एकः सुलताननामा सुपुष्टकायः अश्वः आसीत्। तस्मिन् अश्वे तस्य महती प्रीतिः। स तुरङ्गमः तस्य प्राणेभ्योऽपि प्रियः आसीत्। देवपूजां ध्यानादिकं विधाय बाबाभारती अवशिष्टं समयं हयस्य शुश्रूषायां नयति स्म। प्रतिदिनं सायं समये अश्वम् आरुह्य सुदूरभ्रमणं तस्य दिनचर्यायाः अङ्गम् आसीत्। सुन्दरगतिकः तीव्रगामी तादृशः तुरङ्गमः तस्मिन् प्रदेशे क्वचित् दृष्टिपथं न याति स्म।

तस्य प्रदेशस्य एकः कुख्यातदस्युः आसीत् खड्गसिंहः। तेनापि अश्वस्य प्रशंसा श्रुता। एकस्मिन् दिवसे मध्याह्नकाले स बाबाभारतीम् उपगम्य प्रणामम् अकरोत्। कुशलप्रश्नानन्तरम् श्रीभारती तम् आगमनकारणम् अपृच्छत्।

स उवाच, अश्वस्य कीर्तिः माम् अत्र आकर्षत्। भारती प्रसन्नो भूत्वा तम् उवाच— सत्यम् उक्तवान् असि। ईदृशः घोटकः दुर्लभ एव। एष मम बहिश्चराः प्राणाः। दर्शयामि त्वां तुरगं तस्य गतिं च।

इत्युक्त्वा सः अश्वशालायां बद्धं हयम् उन्मोच्य तम् आरुह्य च गतिं प्रादर्शयत्।

तं सुरूपम् अश्वं विलोक्य खड्गसिंहः बहु प्रशशंस। तस्य मनसि विचारः प्रादुरभूत्, एष साधुः किम् अश्वेन करिष्यति? अश्वोऽयं मम अश्वशालायाः अलङ्करणं भवतु। इति विचार्य सोऽवदत्, भारती — महोदय! नायमधुना तव समीपे भविष्यति।

दस्युः प्रस्थितः। तस्य प्रस्थानेन सह भारतीमहाभागस्य मानसी शान्तिः अपि प्रयाता। अश्वापहरणभीत्या तस्मै किमपि न रोचते स्म। रात्रौ अश्वशालाया बहिः तिष्ठन् प्रहरीव तम् अरक्षत्। निद्रा विलीना। क्षुधा अपगता। देवपूजा विस्मृता।

एवं कतिचन मासा व्यतीताः। खड्गसिंहः न आयातः। श्रीभारती तस्य वचनं दुःस्वप्नम् इव व्यस्मरत्। दिनचर्या यथापूर्वं प्रवृत्ता।

एकस्मिन् दिने सायंवेलायां यदा असौ अश्वम् आरूढः विहाराय

प्रयाति स्म, तस्य कर्णयोः करुणापूर्णः दीनस्वरः समागच्छत् अयि साधो। क्षणं तिष्ठ। मद्वचनं शृणु।

परहितकरणे पटीयान् भारती दयार्द्रः भूत्वा तस्य समीपं गतः। तरुतले विकलांगं जीर्णवसनं कंचित् दीनं पुरुषं वीक्ष्य अपृच्छत्, भो! किं वाञ्छसि?

सोऽवदत् — भद्रपुरुष! अहं पादेन खंजः अस्मि। चलितुं न शक्नोमि।

मया रामवालाग्रामे गन्तव्यम्। ग्रामः इतः क्रोशत्रये अस्ति। मयि दयां विधेहि। माम् अश्वम् आरोप्य तत्र प्रापय। अहं भवतः उपकारं न विस्मरिष्यामि।

भारती हस्तावलम्बेन यावत् तं अश्वम् आरोप्य वल्गां करेण गृहीत्वा कतिचित् पदानि चलति, तरवत् स 'खंजः' अश्वस्य वल्गां बलाद् आकृष्य तं जवेन धावयति।

एतस्मिन् व्यतिकरे विस्मितः भारती अश्वे सगर्वम् आरूढं खड्गसिंहम् अपश्यत्, यं स दीनं पुरुषं मन्यते स्म। तदा स उच्चैः स्वरेण खड्गसिंहं स्थातुम् अकथयत्। स दस्युः तस्थौ उवाच च, नाहम् अश्वं भवते दास्यामि इति निश्चितम्। किम् अपरं कथयति भवान्।

भारती क्षणं विचार्य ऊचे — खड्गसिंह! अयम् अश्वः तवैव। मम कोऽपि सम्बन्धः अनेन नास्ति। अहं केवलम् इदं वच्मि यत्

अद्य घटितम् इदं वृत्तं त्वया कस्मैचित् न आख्येयम्।

खड्गसिंहः उवाच, अहं भवतः कथनस्य आशयं न बोधामि। कस्मैचित् किमर्थं न कथयामि? किं बिभेति भवान्।

भारती अवदत्, ध्यानेन शृणु। यदि जनेषु इदं वृत्तं प्रकाशितं स्यात्, तदा ते कस्मिन् अपि आर्ते दीने च नरे दयां न विधास्यन्ति।

इत्युक्त्वा भारती अश्वम् अपश्यन् एव ततः स्थानात् चलितः।

भारतीमुखात् निःसृतं वचनं पुनः पुनः हृदयम् अतक्षत्। स व्यचारयत् यद् यस्मिन् अश्वे तस्य ईदृशी प्रीतिः आसीत्, यस्य रक्षायां स निद्रासुखं विजहौ, यदर्थं स भगवद्भजनं विसस्मार, अद्य तम् अश्वं विसृजतः तस्य वदने काऽपि विषादरेखा न अलक्ष्यत। केवलम् इदम् एव तं पीडयति स्म यत् कदाचित् लोकाः दुःखितेषु विश्वासं न कुर्युः।

कीदृशोऽयं जनः। नूनम् अयं नराकृतिः देवः।

रात्रौ खड्गसिंहः मन्दिरं प्राप्तः। सर्वत्र नीरवता व्यराजत। अश्वशालायाः द्वारम् अनावृतम् आसीत्। स निःशब्दं गत्वा अश्वम् अबध्नात्, यथागतं च जगाम।

बाबाभारती पूर्ववत् रात्रेः पश्चिमे यामे उदतिष्ठत्। स्नानम् अकरोत। पदानि अश्वशालां प्रति अग्रेसराणि अभवन् किन्तु निमेषमात्रेण निरुद्धानि जातानि। अश्वः स्वामिनः पादक्षेपम् अशृणोत् ऊच्चैः ह्रेषणं चकार।

भारती धावित्वा अभ्यन्तरं जगाम। पितापुत्रौ इव तौ अमिलताम्।

परस्परं हृदयसंवादः जातः। अघटितघटनापटीयसीं भगवतो मायां विभाव्य सहसा भारतीमुखाद् वाक् प्रास्फुरत्, अधुना कोऽपि दीनेषु दयापरिहारं न करिष्यति।

तेजसां हि न वयः समीक्ष्यते



तदानीन्तनी एका घटनाऽस्ति यदा भारतं आंग्लानां पराधीनतापाशात् आत्मानं मोचयितुं यत्नपरम् आसीत्। देशप्रेम्णः लहर्यः समस्तं राष्ट्रम् आप्लावयन्ति स्म।

तदा एकः बालकः आंग्लान् देशात् निष्कासयितुं बद्धपरिकराणां क्रान्तिकारिणां गुप्तरूपेण साहाय्यं आचरति स्म।

तस्य जननी एतेन कर्मणा प्रसन्ना आसीत् किन्तु एकः विचारः तस्याः मनः भयाकुलं विदधाति स्म यत् कदाचित् राजपुरुषैः निगृहीतः मम बालकः कठोरयातनासम्पीडितः सन् सर्वं रहस्यं न प्रकाशयेत्।

एकस्मिन् दिने सा बालकम् आहूय तस्मै स्वीयाम् आशंकाम् प्राकटयत्। बालकः दृढतया अब्रवीत् – अलम् अलम् एतया शंकया। प्राणसंशये समुत्पन्नेऽपि नाहं गुह्यं प्रकाशयिष्यामि।


माता अवदत् – अहं तव दृढतां परीक्षितुम् इच्छामि। सा दीपकं प्रज्वाल्य बालकम् बभाण – किं त्वम् निजकरशाखां दीपशिखायां स्थापयिष्यसि?

बालकः तथाऽकरोत्। तस्य अंगुली वह्निना दग्धा जाता, किन्तु स वीरबालः अग्निदहनवेदनां स्मयमानः असहत।

एतद् अवलोक्य माता आश्वस्ता जाता। लघुवयसं तं बालकं प्रेम्णा परिचुम्ब्य आश्लिष्य च निजगाद – त्वादृशं वीरपुत्रं प्राप्य धन्याऽस्मि।

एष बालः आसीत् महान् क्रान्तिकारी अशफाक–उल्ला। स काकोरीषड्यन्त्रप्रसंगे निगृहीतः सन् मृत्युदण्डम् अवाप। अन्तकाले अपि तं मोदमानं वीक्ष्य दण्डाधिकारिणः विस्मिता अभूवन्।

धन्याः सन्ति ईदृशाः वीरपुरुषाः, तेषां जन्मदात्र्यः मातरश्च।



ओम् प्रकाशठाकुरः

जन्म	:	२० सितम्बर, १९३४।
जन्म स्थान	:	अलीपुर, जिला मुजफ्फरगढ़ (पाकिस्तान)
शिक्षा	:	एम.ए. (संस्कृत),शास्त्री, साहित्याचार्य।
व्यवसाय	:	सेवानिवृत्त उपप्रधानाचार्य।
रचनाएँ	:	१. गीतिमंजरी
	:	२. इन्द्रधनुः , (मुक्तक काव्य)।
	:	(दिल्ली संस्कृत अकादमी द्वारा प्रथम पुरस्कार से सम्मानित)।
	:	३. नीतिकथामकरन्दः।
	:	(दिल्ली संस्कृत अकादमी द्वारा प्रथम पुरस्कार प्राप्त)
	:	४. कथामन्दाकिनी (प्रस्तुत कृति)।
सम्मान	:	अखिल भारतीय पंडितपरिषद् वाराणसी द्वारा 'कविरत्नम्' उपाधि (१९७७)।
	:	भारतीय साहित्य संगम नई दिल्ली द्वारा सारस्वत सम्मान (१९८८)।
	:	शिक्षा विभाग दिल्ली प्रशासन दिल्ली द्वारा 'राज्य शिक्षक पुरस्कार' (१९९२)।
	:	दिल्ली संस्कृत अकादमी दिल्ली द्वारा 'संस्कृत साहित्य सेवा सम्मान' (१९९४)।
सम्पर्क	:	डी ७५७ सरस्वती विहार दिल्ली–११००३४